
आषाढ़मासः
वर्षम् –६७
नवमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ जुलाई २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



ऋषयो मुनयश्छात्रा आषाढश्रावणादिषु।
तपोवनेषु सततं विद्याभ्यसनमाचरन्॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | कारकत्वविचारः | डॉ. सुरेन्द्र कुमार शर्मा | ६ |
| ५ | ग्रहजनिताः रोगाः | देवकीनन्दन शर्मा | ८ |
| ६ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १० |
| ७ | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १३ |
| ८ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १४ |
| ९ | वाल्मीकिरामायणे जीवनदर्शनम् | ओमप्रकाश दोतानिया | १५ |
| १० | वर्तमाने याज्ञवल्क्यस्मृतेः प्रासङ्गिकता | श्रीमती कविता मीणा | १९ |
| ११ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २२ |
| १२ | आचार्यबदरिप्रसादशास्त्रिणां....... | मधुबाला बजाज | २४ |
| १३ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १४ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकाः

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता

ओ.पी. गोयल

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

वेदज्ञानमतीव गुप्तमिति यो ज्ञात्वाऽसृजत् संहिताः।
श्रीमद्भागवतं रसेन भरितं तास्वस्ति भक्तिप्रदम्।।
ज्ञानस्याद्भुतसागरं व्यरचयद् यस्तं महाभारतम्।
आषाढे गुरुपूर्णिमासुदिवसे वन्दामहे तं मुनिम्।।

## मासावतरणम्

आषाढस्य प्रथमदिवसे आगतां मेघमालाम्,
दृष्ट्वा प्रीताः पथिकवनिताः प्रत्ययात्तामपश्यन्।
आशाबन्धः सपदि हृदये पूर्णरूपेण जातः,
तस्मान् मासः शुचिरयमभूत् कामिनीकामपूरः।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आषाढमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
जुलाई, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 9

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

## सम्पादकीयम्

# विचारकुम्भे प्रधानमन्त्रिण उद्बोधनम्

...✍ पं. प्यारेमोहनशर्मा

अलौकिकोर्जया परिपूर्णामुज्जयिनीं प्रणमामि यत्र पवित्रा शिप्रानदी प्रवहति देवाधिदेव: महाकालश्च यत्र विराजते। अखिलविश्वस्य जना: आश्चर्यं प्रकटयन्ति यद् विनैव निमन्त्रणं देशविदेशेभ्य: कोटिश: सिंहस्थ-कुम्भे स्नानेन पुण्यलाभाय कथं समवेता जायन्ते। स्वकीये-नैवानुशासनेन शान्त्या पुण्यस्नानं विधाय महाकालदर्शनं च विधाय स्वकीयदेशेषु प्रदेशेषु च गच्छन्ति। वस्तुत एषोऽस्माकं सांस्कृतिकपरम्पराया एव चमत्कार:। अत एवास्माकं ऋषयोऽवदन् ''भद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: स्थिरैरङ्गैस्तुष्टुवाँस्तनूभिर्व्यशे-महि देवहितं यदायु:।''

प्रधानमन्त्रिणा कथितं संप्रति वैज्ञानिकक्रियया विश्वमेकनीडमजायत परन्तु यथा-यथा विकास क्रिया प्रावर्धत तथा तथा वयं प्रकृतितो दूरं प्रयाता:। महत्वाकाङ्क्षा: प्रत्यहं वर्धन्ते। भारतीयं चिन्तनं प्रकृत्या सह योजनं शिक्षयति। आत्मनो नियन्त्रणं शिक्षयति। मानव: स्वकीयां महत्वाकाङ्क्षां नियन्त्रितां विधाय प्रगतिपथि अग्रेसरो भवेदिति भारतीया: योगेनोपदिशन्ति। अस्माकं परम्परायामपि ''भोग:'' स्वीकृत: वयमपि भोगं भुञ्जाम: परन्तु त्यागपूर्वको भोग: सदैव कल्याणकारी भवति। अद्य वयं प्रकृतिं भुञ्जाम: परन्तु तत्र त्यागभावो न विद्यते स्वहिताय स्वार्थाय प्रकृतेर्भोगो न कल्याणाय। यदि वयं त्यागपूर्वकं भोगविचारं स्वजीवने स्वीकुर्मस्तर्हि समाजस्य विश्वस्य च सर्वासां समस्यानां समाधानं कर्तुं शक्नुम:।

सम्प्रति विश्वं शान्तिमार्गमपेक्षते। अत एव विश्वस्मिन् विश्वे ''योग:'' जीवनस्याभिन्नो भाग: सञ्जात:। यतोहि योगमाध्यमेनैव परिवर्तनं संभवति।

जलवायुपरिवर्तनम् आतङ्कवाद इत्यादयो विश्वस्मिन् विश्वे गभीरा: समस्या: वर्तन्ते। जलवायुपरिवर्तनेन कृषि-खाद्यान्न सुरक्षा जलसंकटं महिलासुरक्षा आजीविकादयो गम्भीररूपेण प्रभाविता: सन्ति। सहैव दीनता विषमतादयो वर्धन्ते।

अस्मिन् विषये भारतसर्वकार: ऊर्जाया: विकल्पान् ''सौर-ऊर्जा'', प्राथम्येन स्वीकर्तुं यतते। दीनेभ्य: (बैङ्क) कोषसम्बन्धिसुविधा, (टेक्नोलोजी) तकनीक-कौशलम् उपार्जनावसरान् प्रदातुं सर्वात्मना प्रयतते। वयं विश्वसिमो यत् अस्माकम् एष: कार्यक्रम: शीघ्रमेव पूर्णतामेष्यति। परन्तु विभिन्नदेशेभ्य: दैन्यं विषमतां चापाकर्तुं वैश्विकी सम्भागिता करणीया भविष्यति। येषां विकसितदेशानां सविधे संसाधनानि सन्ति नवीन-ज्ञानविज्ञानानि च विद्यन्ते ते देशा विकासशीलदेशेभ्य: तत् सर्वं वितरेयु:। अद्य भारतम् एशियाअफ्रीका-विकासशीलदेशै: सह सम्मेलनं विधाय वैश्विकविकासे स्वकीयं महत्वपूर्णं योगदानं विदधाति। अस्माकं कथनं विद्यते यद् विकसिता उद्योगे समुन्नता: देशा: स्वकीयमुत्तरदायित्वं सम्यक्रूपेण पालयेयु:।

भारतसर्वकार: कृषकेभ्य: फसलबीमायोजनां प्रारभत अनया योजनया न्यूनतमप्रीमियमेन क्षतेरधिकतमा पूर्तिर्भवेदिति प्रयासो विहित:।

परन्तु प्रकृते: सन्तुलित उपभोगो विधातव्य:। प्रकृतौ विजयप्राप्ते: लालसाया: परिणाम एव (ग्लोबल वार्मिंग) भौगोलिकोष्मीकरणरूपेण समायात इति वयं पश्याम:। महात्मा गान्धी अवदत् यत् प्रकृति: मानवस्य आवश्यकतां पूरयितुं पूर्णरूपेण समर्था विद्यते। सन्ति

तत्सविधे पर्याप्त- संसाधनानि परन्तु लोभो न तत्र विधेयः।

निरन्तरं ऋतुपरिवर्तने जायमानेऽपि मध्यप्रदेश-राज्यसर्वकारस्य संवेदनशीलतया कृषि-उत्पादनं सिञ्चितक्षेत्रं च निरन्तरं वर्धते।

ग्रामाणां विकासं विना देशस्य प्रगतिः शून्यप्राय एव विद्यते इति समालोच्यैव भारतसर्वकारः ग्रामोदयेन भारतोदयाख्यमान्दोलनं प्रारभत। बाबासाहब-अम्बेडकराः सामाजिकसमरसताया दलितानां वंचितानां च देवता (मसीहा) अविद्यन्त। ग्रामोदययोजनामाध्यमेन पंचायतीराजव्यवस्था सामाजिकसद्भावः ग्रामीण-विकासः कृषकाणां प्रगतिः दीनानामाजीविका-संसाधनानि वृद्धिं यास्यन्ति। ग्रामेषु लोकेभ्यः कार्यमाजीविकादीनि मूलभूतसाधनानि च सम्प्राप्तानि भवेयुरिति हेतोः कुटीरोद्योगान् पुनः संस्थापयामः एतदर्थं ''मुद्रा'' योजना प्रारब्धा। अनया योजनया लघूद्योग-स्थापनाय आर्थिकीं सहायतां ग्रामीणाः प्राप्स्यन्ति। वैश्वीकरणसमये भारतम् अपि अग्रेसरतां यायादिति धिया ''कौशलविकासकार्यक्रमं'' ग्रामेषु भारतसर्वकारः संस्थापयति।

कौशलविकासकार्यक्रमेण वित्तीयसाहाय्येन च युवतयोऽपि विभिन्नक्षेत्रेषु दक्षतां प्राप्स्यन्ति। मध्यप्रदेशस्य मुख्यमन्त्रिशिवराजचौहानमहोदयेन ''पुत्रीं रक्षतु'' कन्यादानायार्थिकीसहायतादयः कार्यक्रमाः प्रवर्तिता एतदर्थं भूरि भूरि प्रंशसां करोमि अन्येऽपि एतेषामनुकरणं कुर्युः इति निवेदयामि।

अवन्तिका महाकालस्य नगरी तु वर्तत एव परन्तु शक्तिपीठमपि विद्यते। अत्र मातुः हरसिद्धेः मन्दिरं वर्तते। विश्वस्य सर्जनात्मिका शक्तिः स्त्रीणां सविधे विद्यते। इमा नवजीवनं रचयन्ति संरक्षन्ति वर्धापयन्ति च। अत एव इमाः मातरः सम्मानार्हाः विद्यन्ते। वयमासां सुरक्षां सम्मानं च सदैव सर्वात्मना विधास्यामः।

स्त्रियः स्वच्छतां प्रति विशेषरूपेण जागरूका विद्यन्ते वयं सर्वे यदि अमुं विशेषगुणं व्यवहरामस्तदा तु स्वच्छताभियानं तीव्रगत्या वर्धिष्यते। स्वच्छता पवित्रतां यच्छति। अहं साग्रहं निवेदयामि यत् भवन्तः सर्वे क्षिप्रानद्याः पवित्रे तटे एतं संकल्पं नीत्वा स्वस्थानेषु गच्छन्तु यत् स्वग्रामं, वसतिं, विद्यालयं, तडागं, कूपं सरितं स्वच्छां विधास्यामः एतदर्थमधिकाधिकान् जनान् प्रेरयिष्यामश्च। यथास्माकं शरीरे सूक्ष्माः शिराः रक्तं सञ्चारयन्ति तथैव पृथिव्यां सञ्चरन्त्यः सरितः प्राणिमात्रस्य जीवनं रक्षन्ति। अत एव जीवनदातृसरितः श्रद्धया स्वच्छा रक्षणीयाः। स्वच्छताभियाने सर्वेषां सहयोगः परमावश्यकः। सर्वे मिलित्वा कार्यं सम्पादयिष्यामस्तदैव स्वच्छं भारतं रचयिष्यामः।

विश्वस्य सर्वाः समस्याः समाधानमेष्यन्ति कर्तव्यालम्बनेन। यथा वयमधिकारान् प्रति जागरूका वर्तामहे तथैव कर्तव्यपालनं प्रति जागरूकाः भवेम। परिवारसमाजराष्ट्रं प्रति मम किं कर्तव्यं वर्तते इति चिन्तनमेव आदर्शसमाजं रचयति। एतद्र्थं यथा मध्यप्रदेशे लोकसेवागारण्टी अधिनियमेन एकस्मिन् दिन एव लोकानां समस्यानां समाधानं सर्वकारेण विरचितं तेनोत्तरदायित्वबोधो जायते। सर्वेषां भारतीयप्रदेशानां सर्वकाराः एतस्यानुकरणं कुर्युः।

अद्य सम्पूर्णः संसारो भारतादपेक्षते यद् विश्वस्य विकासे शान्तिपूर्ण-भ्रातृभावे विश्वस्य नेतृत्वं विधास्यति। अहं सुदृढं वच्मि यद् भारतं स्वकीय-मुत्तरदायित्वं पूर्णनिष्ठया पालयिष्यति। अस्माकं भाविसन्ततयः अस्माकं प्रयासे गौरवमनुभविष्यन्ति।

भवन्तो महाकुम्भे शपथं गृह्णन्तु यद् विश्वं सुन्दरं रचयित्वा भारतस्य गौरवं वर्धापयिष्यामः।

अन्ते अहं मंगलकामनां करोमि यद् भवन्तः, सर्वे सकारात्मकोर्जया महाकुम्भस्य कल्याणकारिणं सन्देशं विश्वस्मिन् विश्वे प्रसारयन्तु। शुभं भवतु।

# कारकत्वविचारः

❑ डॉ. सुरेन्द्र कुमार शर्मा

सुबिति प्रत्याहारः। स चैकविंशतिस्वादिविभक्तीनां बोधकः। आसां प्रातिपदिकप्रकृतिकानां स्वादीनामर्थः सुबर्थः। स च सुब् द्विविधः। तत्र यद्धातूपस्थाप्य यादृशार्थेऽन्तः प्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्य तादृशक्रियायां कारकम्। तदुक्तं शब्दशक्तिप्रकाशिकायां-

**क्रियाकारकार्थेतरा च सुप् द्विधा च विभज्यते।**
**धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्॥इति।**

**कारकलक्षणम्-**

क्रियानिष्पादकत्वं कारकत्वं तच्च करोति क्रियां निर्वर्तयति इति भाष्ये व्युत्पत्तिप्रर्दशनात्। निष्पादयति-उत्पादयति-निष्पादको जनकः। तेन क्रियाजनकत्वं कारकत्वमिति लब्धम्। जनकत्वं चात्र कारणत्वरूपं विवक्षितम्। कारणत्वञ्च अन्यथासिद्धशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यन्ताभाव-प्रतियोगितानवच्छेदकधर्मत्वम्। तथा च 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यादौ ब्राह्मणस्य न कारकत्वं पुत्रेणान्यथासिद्धया तत्त्वाभावात्। क्रियाजनकत्वादेवैषां कारकाणां क्रियायामेवान्वय ननु क्रियानिमितत्त्वं कारकत्वमिति स्वीकार्यमिति चेन्न चैत्रस्य तण्डुलं पचतीत्यत्र सम्बन्धिनि चैत्रादावतिव्यासेः। अनुमानादिप्रकाशनद्वारा सम्पादनादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात्। किन्तु क्रियान्वितविभक्त्यर्थान्वितत्वं क्रियानिर्वत्तकत्वं वा कारकत्वम्। विशेष्यतया क्रिया सुप्तिङन्यतरविभक्त्यर्थेऽन्वेति। स च विशेष्यतयैव चैत्रघटादौ। षष्ठ्यर्थस्य तण्डुलादिनामर्थान्विततया क्रियाऽनन्वितत्वात्। अत एव षष्ठ्यर्थस्योपविभक्त्यर्थस्य च न कारकत्वं क्रियान्वयाभावादिति शाब्दिकाः। विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वं, क्रियानिमित्तत्वसहितमुख्यमिति भवानन्दतर्कवागीशाः।

अयमत्र विवेकः प्राचीनानां यत् करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयति इति व्युत्पत्तेः महासंज्ञा क्रियान्वयित्वमेव कारककर्मादिसंज्ञोद्देश्यतावच्छेदकम्। कारकशब्दस्य क्रियापरत्वमेव शीघ्रोपस्थितिकत्वेनान्वयीत्यध्याहारेण तदन्वयित्वस्यैवकर्मादिसंज्ञोद्देश्यतावच्छेदकत्वलाभात्। रूढ्यर्थतावच्छेदकं तु कारकपदवत्वं तज्ज्ञाप्यशक्तिमत्त्वं वा। तेन च कारकाणां क्रियान्वयः' इति प्रयोगानुपपत्तिः। ब्राह्मणस्य पुत्रं पृच्छतीत्यादौ क्रियान्वयित्वाभावान्न ब्राह्मणादेः कारकत्वम्। घटं करोतीत्यादौ घटादेः क्रियान्वयित्वस्य सत्वादाञ्जस्येनैव कारकत्वमुपपद्यत इति न आरोपापेक्षाधिकरणस्यापि कर्तृकर्मघटितपरम्परासम्बन्धेन। 'अक्षशौण्ड' इत्यादौ समासस्तु शौण्डादिपदस्य आसक्तशौण्डादौ लक्षणाश्रयणादुपपादनीयम् इत्याहुः।

नवीनास्तु मन्यन्ते यत् करोतीति कारकमिति व्युत्पत्त्या क्रियाजनकत्वस्यैव आञ्जस्येन लाभात् तदेव कारकत्वमिति अधिकरणस्य कर्त्तृकर्मद्वारा क्रियान्वयेन क्रियाजनकत्वरूपकारकत्वस्योपपत्तेः। 'अक्षशौण्डः' इत्यादौ लक्षणाश्रयणं विनैव सिध्यति न तत्र लक्षणा। अत एवाक्षविषयकशौण्डत्ववान् इति विवक्षितबोधस्तत उपपद्यते। अक्षशौण्डस्य धनमस्तीत्यादौ तु अगत्या लक्षणाश्रयणम्। तत्र शौण्डत्वस्याधवविधेयत्वेन लक्षणाश्रयणे बाधकाभावादित्याहुः।

वस्तुतस्तु प्राचीनमतापेक्षया नवीनमते न किमपि लाघवं तत्रापि लक्षणास्वीकारात्। प्राचीनमते 'अक्षशौण्डः' इत्यत्र शौण्डत्वस्य विधेयत्वेन 'न विधौ परः शब्दार्थः' इति बोधसत्वेन लक्षणाभावो न शङ्कनीयः' अस्य न्यायस्य क्वाचित्कत्वात्, क्रियाया एव विधेयत्वस्वीकाराच्च, सर्वं वाक्यं क्रियया परिसमाप्यते' इति न्यायात्।

वृक्षात् पतति, व्याघ्रात् बिभेति इत्यादौ ब्राह्मणाय ददाति, पुत्राय क्रुध्यति इत्यादौ दात्रेण छिनत्ति, घटत्वेन जानातीत्यादौ, स्थाल्यां पचति, शुक्तौ भासते इत्यादौ ग्रामं

गच्छति, घटं पश्यति' इत्यादौ चैत्रेण पच्यते, घटेन भूयते, इत्यादौ च पतप्रभृतिधात्वर्थे पतनादौ पञ्चम्याद्युपस्थितौ विभागादिः प्रकारीभूय भासते इति तत्तद्धातूपस्थलापितत्तत् क्रियायां विभागादिकं प्रकृतेः कारकं अतो धात्वर्थे स्वार्थबोधकतया तत्र पञ्चम्यादिः कारकविभक्तिरुच्यते। यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते, तेन वृक्षात् पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकव्यवहारः। स्तोकं पचतीत्यादौ क्रियायां प्रकारीभूतोऽपि स्तोकादिर्न कारकं सुपानुपस्थापनात्, द्वितीया तु तत्र क्लीबलिङ्गत्ववदनुशासनिक्येव। 'स्तोकपाक' इत्यादिकस्तु तत्पुरूषो 'गिरिकाण' इत्यादिवद्विशेषविधेरेव। षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते 'तण्डुलस्य' पचतीत्याद्यप्रयोगादतः सम्बन्धो न कारकं, न वा तदर्थिकाऽपि षष्ठ्यादिकारक-विभक्तिः, अत एव-

**क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम्।**
**कर्तृकर्मादिभेदेन शेषः सम्बन्ध इष्यते।। १ ॥**

इति शाब्दिकाः पठन्ति। शेषः कारकादवशिष्टः। सम्बन्धः कारकादन्य इत्यपि पठन्ति। रजकस्य वस्त्रं ददातीत्यादौ च परिष्कार्यत्वादिलक्षणः सम्बन्धो वस्त्रादावेव षष्ठ्याऽनुभाव्यते। तण्डुलस्य पाचकः, मैत्रस्य भोक्तव्यमित्यादौ कर्मत्वकर्तृत्वादिकं कारकमेव धात्वर्थे पचनादौ, कृद्योगे कर्तृकर्मणोः षष्ठ्यनुशिष्टेः।

तार्किकास्तु- क्रियान्वयित्वं कारकत्वम्। अन्वयश्च विभक्त्यर्थमभ्यन्तरीकृत्य बोध्यः। क्रियावृत्तिविषयतानिरूपितविभक्त्यर्थ-निष्ठविषयताश्रयत्वमिति यावत्। स्तोकं पचतीत्यत्र क्रियाविशेषणस्य स्तोकस्य कारकत्ववारणाय विभक्त्यर्थस्याभ्यन्तरीकरणम्। ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यत्र ब्राह्मणस्य विभक्त्यर्थद्वारापि क्रियान्वयित्वाभावान्न कारकत्वमिति विवृण्वन्ति। तदसमीचीनं- भूमौ शेते स्थाल्यां पचतीत्यादौ भूमिस्थाल्योः कर्तृकर्मद्वाराक्रियान्वयित्वेन विभक्त्यर्थद्वारा अन्वयाभावात् कारकत्वानापत्तेः। कारकं विभजते-

**कर्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्॥**

अपि च-

**अपादानसम्प्रदानकरणाधारकर्मणाम्।**
**कर्त्तुश्च भेदतः षोढा कारकं परिकीर्तितम्२॥**

कर्तृकारकं- तत्र प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम्। 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते' इति हर्य्युक्तेः। अन्यकारकनिष्ठो व्यापारस्तु न प्रकृतधातुवाच्यः। यथा वह्निना पचतीत्यत्र वह्निनिष्ठः प्रज्वलनादिः। अन्यकारकनिष्ठव्यापाराश्रयस्य कर्तृत्ववारणाय धातुवाच्येति। तत्रोक्ते तु कारकमात्रे प्रथमैव। तिङ्समानाधिकरणे प्रथमा, अभिहिते प्रथमेति वार्तिकद्वयात्। सूत्रमते कर्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थः। तस्य चाख्यातार्थकर्त्रादिना अभेदान्वयेन प्रथमार्थस्य कारकत्वम्। अत एवाख्यातार्थद्वारा क्रियान्वयात् तदर्थस्य क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः। चैत्रो भवतीत्यत्र एकत्वावच्छिन्नचैत्राभिन्नकर्तृकं भवनमिति बोधः। आख्यातकृतादिना कर्त्रादेरभिधानेऽपि प्रथमयाऽनुद्भूतकर्तृत्वादिशक्तिः प्रतिपाद्यते इति तात्पर्यम्। कर्माख्याते तु चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रकर्तृकव्यापारजन्य एकत्वावच्छिन्नकर्मनिष्ठसंयोग इति बोधः। सम्बोधप्रथमार्थस्यापि अनुवाद्यत्वेनोद्देश्यतया युष्मदर्थाभेदेन विधेयक्रियायामन्वयात् क्रियाजनकत्वरूपं कारकत्वम्। देवदत्त त्वं गच्छेत्यादौ अभिमुखीभवद्देवदत्ताभिन्नयुष्मदर्थोद्देश्यकप्रवर्त्तनादिगमनमिति बोधः। अत एव-

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः३॥**
**सुपां कर्मादयोऽप्यर्थाः संख्या च तथा तिङाम्।**

इति भाष्यं च सङ्गच्छते। कर्तृतृतीयाया आश्रयोऽर्थः।

**प्राचार्यः**

**श्रीदादूसंस्कृतमहाविद्यालयः, जयपुरम्**

चिकित्सा ज्योतिषञ्च

# ग्रहजनिताः रोगाः

❑ देवकीनन्दन शर्मा

चिकित्साशास्त्रं ज्योतिषशास्त्रञ्चेत्युभयमेव मानवपीडाभिः सम्बद्धमस्ति। कश्चनापि चिकित्सको बोधयितुमिदमसमर्थ एव यदेकः स्वस्थो जनः कदा च रोगेण पीडितो भवितुं शक्नोति। ज्योतिर्विज्ञानमिदं विश्वासपूर्वकं बोधयितुं शक्नोति यदमुको जनः कदा केन रोगेण कियत्कालं यावच्च पीडितो भविष्यति। रोगिणः पूर्णतः स्वास्थ्यलाभावधिमपि वक्तुं शक्नोति शास्त्रमिदम्। एतत्सर्वमपि विना तं जनं दृष्ट्वैव केवलं तस्य जन्मकुण्डलीमवलोक्यैव निश्चितं कर्तुं शक्यते। आयुर्वेदज्योतिषशास्त्रयोस्तु महान् सघनः सम्बन्धोऽस्ति। काश्चन औषधयः ईदृश्यः भवन्ति यासां निर्माणं नियतकाल एव क्रियते। सौरमण्डलस्य सर्वेषां ग्रहाणां काश्चन विशिष्टताः सन्ति। ग्रहानुकूलं लाभदृष्ट्या औषध-निर्माणं क्रियते चेत्तदौषधप्रभावो महान् अधिकश्च जायते।

केचन रोगास्तु एतादृशास्सन्ति ये सूर्यचन्द्रयोः विशिष्टप्रभाववशादेव जायन्ते। चन्द्रो यथा सामुद्रिकजले कोलाहलमुत्पादयति तेन च वेलावृद्धिक्षयौ जायेते तथैव शरीरे प्रवहमान रक्तस्य गतिरपि दुष्टा जायते। जातकस्य जन्मकाले चन्द्रस्य दुर्बला स्थितिर्भवेत्तथा च रक्तसम्बद्धभावोऽपि दुर्बलो भवेत्तर्हि चन्द्रस्य दुर्बलत्वात् प्रबलत्वाच्च रक्तसम्बद्धानां रोगाणां वृद्धिः क्षयो वा जायते। इदन्तु एकमुदाहरणमस्ति। इत्थमेव नैकेषां रोगाणां पूर्वज्ञानं प्राप्तुं शक्यते तथा च तेभ्यः रक्षणोपाया अपि प्राप्तुं शक्यन्ते।

ज्योतिषशास्त्रे रोगस्य दैव्यव्यपाश्रयचिकित्सा प्राप्यते। वातपित्तकफादिभिः तिसृभिः प्रकृतिभिः ग्रहाणां सम्बन्धः, शरीराङ्गेषु राशीनां ग्रहाणां च विनिवेशः बालारिष्टायुः प्रभृतीनां विषयाणां प्राप्तिश्चेत्येतत्सर्वं रोगदिशायां महत्त्वपूर्णायामत्वेन वर्तते। ज्योतिषशास्त्रे रोगाणां वर्गीकरणस्य लक्षणानाम् (ग्रहयोगस्य) उपायानां (उपचाराणां) च परिचर्चा प्राप्यते।

ज्योतिषशास्त्रेणैव रोगोत्पत्तेः मूलकारणेषु 'कर्म' इति स्वीकृतम्। अतएवात्र कर्मजो दोषजश्चेति द्विविधानां व्याधीनां चर्चा प्राप्यते। एतदतिरिक्तं तृतीयस्य आगन्तुक-व्याधेरुल्लेखः प्राप्यते।

शास्त्रेऽस्मिन् ग्रहाणां प्रकृति-धातु-रसाङ्गावयव-स्थान-बलादिवैशिष्ट्याधारेण रोगाणां विनिश्चयोऽपि विहितोऽस्ति तथा च तन्निदानात्मकोपाया अपि निर्दिष्टाः सन्ति।

**नवग्रहजनितरोगाः**

सर्वे पापग्रहाः रोगान् उत्पादयन्ति। एते ग्रहाः शुभस्थितौ न भवेयुश्चेत् अपि रोगान् जनयन्ति।

**1. सूर्यग्रहजनित रोगाः**

सूर्यग्रहः पापग्रहेण युक्तो भवेदथवा पापग्रहेण पीडितो भवेच्चेत् चर्मरोगान्, अस्थिभङ्गत्वं, नेत्रज्योति-र्विकारान्, अन्धत्वं, शिरोपीडां, नेत्रकष्टं ज्वरम्, अतिसाररोगं, क्षयरोगं, पित्तविकारम्, अग्निरोगं, हृदयरोगम् उदररोगान् च जनयति तथा च जीवनशक्तेः ह्रासो मानसिककष्टञ्च जायेते।

**2. मङ्गलग्रहजनितरोगाः**

यदि मङ्गलग्रहः पापग्रहेण युक्तः पीडितो वा भवेन्तर्हि मज्जादोषः, रक्तकोपः, पित्तदोषः, विषेण अस्त्रशस्त्रादिभिश्च कष्टम्, उष्णरोगः, देहभङ्गत्वं, नेत्र-पीडा, कुष्ठरोगः अपस्माररोगः व्रणपीडा, दन्तपीडा, अङ्गुलीविकृतिः, वातरोगः, वामकर्णरोगः, आन्त्रज्वरः, मूत्ररोगः, प्रस्तररोगः, गुर्दरोगः (वृक्करोगः) चोत्पद्यन्ते।

**3. बुधग्रहजनितरोगाः**

बुधग्रहः पापग्रहेणयुक्तः दृष्टो वा भवेच्चेत् सन्निपात-ज्वरः, अचेतनत्वम्, अस्पष्टभाषणत्वं वाण्यङ्गदोषः, ओष्ठ-तालु-जिह्वा स्वरयन्त्रविकृतिः, चर्मरोगः, सङ्ग्रहणी-रोगः, पेचिशरोगः अतिसाररोगश्च जायन्ते।

**4. गुरुग्रहजनितरोगाः**

गुरुग्रहः पापग्रहेण युक्तो दृष्टो वा भवेच्चेत् मूर्च्छत्वम्, आन्त्ररोगः, मस्तकशून्यत्वम्, अङ्गशोथः, रक्तसंचरण-विकृतिः, रुधिरविकृतिः, स्थूलदेहत्वं, वमनं, कर्णपीडा, यकृत्दोषः, पीतरोगः, मधुमेह श्चोत्पद्यन्ते।

**5. शुक्रग्रहजनित रोगाः**

शुक्रग्रहः पापग्रहेण युक्तो दृष्टो वा भवेच्चेत् प्रमेहरोगः, बहुमूत्रत्वं, मूत्रावरोधः प्रदररोगः, मूत्रदाहः वृक्कदोषः, नेत्ररोगः, पीतरोग: गुप्ताङ्गदोषः, व्यभिचारदोषः दुष्टस्त्रीसंसर्गरोगः, नपुसंकत्वं, गर्भाशय-रोगः, कण्ठरोगः, मातृप्रकोपः, स्तनरोगः, श्वासरोगः दमारोगः, श्वेतकुष्ठरोगश्चेत्यादयो रोगाः जायन्ते।

**6. चन्द्रग्रहजनित रोगाः**

चन्द्रग्रहः पापग्रहेण युक्तो दृष्टो वा भवेच्चेत् अनिद्रारोगः, निद्रादोषः निद्रागमनदोषः, व्रणत्वम्, अजीर्णत्वम्, अग्निमन्दत्वं शीतरोगः, पीतरोगः, शुष्करोगः, शीतज्वरः, रक्तविकारः, रक्ताल्पता, जलपीडा, शृंगयुक्तैः पशुभिः कष्टश्चेत्यादयो रोगाः जायन्ते।

**7. शनिग्रहजनित रोगाः**

शनिग्रहः पापग्रहेण युक्तो दृष्टो वा भवेच्चेत् अतिकष्टकारक रोगाः पादपीडा, जानुपीडा, हृदयविकारः, रक्तचापः, दन्तरोगाः, पक्षाघातः, दीर्घावधिरोगाः, नाडीरोगः, जङ्घारोगश्चोत्पद्यन्ते।

**8. राहुग्रहजनित रोगाः**

राहुग्रहः पाग्रहेण युक्तो दृष्टो वा भवेच्चेत् कुष्ठरोगः हृदयरोगः, भूतबाधा, स्मरणशक्तिह्रासः, बुभुक्षापिपासा-रोगः, श्वासरोगः उदरकृमिरोगश्चोत्पद्यन्ते।

**9. केतुग्रहजनित रोगाः**

केतुग्रहः पापग्रहेणयुक्तो दृष्टो वा भवेच्चेत् सम्पूर्णेऽपि शरीरे कण्डूतिः, मातृप्रकोपः, प्रेतपीडा, अजीर्णत्वं, तान्त्रिककष्टञ्चेत्यादयो रोगा जायन्ते।

संस्कृत-शिक्षकः
रा.उ.प्रा.सं. विद्यालयः, हींगवा
तह.-सिकराय, दौसा (राज.)

## संस्कृतसमाचारः

# ऐषमः बालसाहित्यकारपुरस्कारः ऋषिराज-जानी वर्याय

केन्द्रीय साहित्याकादम्या 2016 ई. वर्षस्य संस्कृतभाषाया बालसाहित्यकारपुरस्कारः ऋषिराज-जानीवर्याय प्रदातुं घोषणा कृता। अष्टाविंशतिवर्षीयेण अनेन युवकेन गतवर्षे युवसाहित्यकारपुरस्कारोऽपि 'समुद्रे बुद्धस्य नेत्रे' इति काव्यसंग्रहस्य कृते लब्धः। 'चमत्कारिकः चलदूरभाषः' तस्य बालकथा-संग्रहोऽस्तीति 'भारती' पत्रिकायाः पाठका जानीयुरेव पुस्तकस्यास्य भारत्यां चर्चितत्वात् ऋषिराज जानी 2016 ई. वर्षस्य पुरस्कारमिमं भारतभूषणरथः 'वनवैभषवम्' इति काव्यसंग्रहस्य कृते प्राप्स्यति। भारती पत्रिकातः नैकानि अभिनन्दनानि।

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# आयुर्वेदीयकथाष्टकम्

प्राचीनभारते तादृशानि बहून्युपाख्यानान्युपलभ्यन्ते येषु सफल-चिकित्सायाः शल्यक्रियायाः, आयुर्वेद-शास्त्रीयविज्ञानशाखानामुन्नतेश्च सन्दर्भा द्रष्टुं शक्यन्ते। वेदकालादारभ्याऽद्यावधि आयुर्वेदस्य समादरः समस्तेऽपि देशे विलोक्यत एव यत्र निदानोपचारादयः, शल्यशालाक्यादयः, रसायन-वनस्पत्यौषधादिविषयाश्च सततमनुशील्यन्ते, पठ्यन्ते पाठ्यन्ते च। प्राचीनोपाख्यानेषु लक्ष्मणे शक्तिप्रहारेणाऽऽहते कथं हनूमता द्रोणाचलात् सञ्जीवनी समानीता यस्यां विशल्यकरणी, सावर्ण्यकरणी, सन्धानी, सञ्जीवकरणीप्रभृतयः ओषधयोऽभूवन् कथं च सुषेणेन शल्यक्रिया (स्किन-ग्राफ्ट, शल्यनिष्कासनसन्धानसावर्ण्यकरणप्रभृतयः क्रियाः) साफल्येन सम्पादिता इत्यादयः कथा जन-सामान्येऽपि प्रचलिताः सन्त्येव। प्रबुद्धवर्गस्तु जानात्येव यत्प्राचीनकाले दध्यङ् आथर्वणो मधुविद्या-विशारदोऽभूत्, महर्षिच्यवनश्चिरयौवनप्रदातृविद्या-विशारदोऽभूदित्यादि।

आयुर्विज्ञानसम्बद्धा ईदृश्यः कथा नूनं मानसमुद्वे-लयन्ति। यद्यपि हितोपदेश-पञ्च-तन्त्रादिकथासङ्ग्रहेषु नैतादृश्यः कथाः सङ्कलिता यतोहि तादृशा ग्रन्था बालानां कृते प्रमुखतो व्यरच्यन्त। एवं विधानामायुर्वेदसम्बन्द्धानां कथानां प्रणयनं नूतनः कश्चन स्वागतार्हः प्रयोगः सिध्येदिति विचार्यैव मन्ये वरिष्ठेनाऽऽयुर्वेदविदुषा राजस्थानीयायुर्वेदविश्वविद्यालय (जोधपुर) कुलपति-चरेण प्रो. बनवारीलालगौडेन प्राचीनानामायुर्वेदीय-कथानां प्रणयनं कृतम्, अष्टानां तादृशकथानां हिन्द्यनुवादसहितं प्रकाशनमपि जयपुरात् सम्पन्नमिति ज्ञात्वा हर्षविस्मयादिभावशबलतामनुभवेयुः सुधयः।

आयुर्वेदीयकथाष्टकेऽस्मिन् प्रमुखतः प्राचीना वेदकालिकाः कथा विस्तरेण कथानकसूचनविधया निबद्धाः सन्ति। स्ववैंद्ययोरश्विनिकुमारयोः कथा तु प्राथम्यमर्हत्येव यत्रेदं सूचितं यत्प्रजापतिस्त्वष्टारं प्रैरिरदश्विनीकुमाराभ्यामायुर्वेदशिक्षणाय। अन्या कथा मधु-विद्याविदो दधीचोऽस्ति यत्र प्रथमत इदं वर्णितमस्ति यद् दध्यङ् आथर्वणः कथं मधुविद्यामर्जितवान्। तस्य शिरश्छेदोऽभवत् किन्त्वश्विनीकुमाराभ्यां शिरः प्रत्यारोपितमभूत्, सेयं मधुविद्या भारतेऽति प्राचीना यस्य पुरोधा दध्यङ् अभूत्। परस्ताद् वृत्रवधाय वज्रं निर्मातुं स्वयमिन्द्रो दधीचेरस्थीन्ययाचत तानि च वज्रं निर्ममु-रित्यादिकथाऽप्यत्राऽन्तर्हिता।

वेदकालीनैका कथा विश्पलानाम्न्या महिष्या अस्ति। सेयं महिषी स्वयं युद्धक्षेत्रेऽवततार, युद्धकाले तस्या जङ्घाया अस्थि भग्नं किन्तु तस्योपचाराय प्रार्थिताभ्याम-श्विनीकुमाराभ्यां तस्यै आयसी जङ्घा प्रत्ता सा च सम्यक् ''प्रतिष्ठापिता'' इति प्राचीनतमे ऋग्वेदे स्पष्टं वर्णितमस्ति ''सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम्'' (8/11/10/15)। किं नाऽस्तीदं नवीनतमस्य जङ्घाद्यस्थ्नां कृते आयसशलाका (रॉड) प्रति- ''स्थापन''स्य प्राचीनतमं संस्करणम् ? किं नानेन स्पष्टीभवति शल्यक्रियायाश्चरमोन्नतिः प्राचीनतमे वेदकालीने भारते ? अस्तु। सेयं कथा सुबहुना विस्तरेण विश्पला या विवाहप्रसङ्गमारभ्य वर्णिताऽस्ति लेखकेन। एवंविधैव चन्द्रमसः कथाऽपि पुराणेषु प्रसिद्धा यत्र 27 नक्षत्रैः सह चन्द्रमसा विवाहः कृतोऽभूत् किन्तु रोहिण्यां स्नेहातिरेकं दृष्ट्वा पक्षपातमिमसह्यं मन्वानेन प्रजापतिना स शापितो यक्ष्मरोगी समभवत् तदनु चिकित्सित इत्यादि। सर्वमिदं प्रतीकरूपमेव किन्तु कथामेनामायुर्वेददृशा व्याख्याय लेखकेनात्र पुरुषाणां स्वस्थचर्या सङ्केतिताऽस्ति।

वेदकालीनैका मान्यताऽस्ति यद् वैदिको देवः पूषा ''अदन्तकः'' (दन्तहीनः) अस्ति। तस्मै नैवेद्यरूपेण कोमलः करम्भभागः प्रदीयते इति कौषीतकिब्राह्मणे स्पष्टीकृतमस्ति। ''तस्य दन्तान् परोवाप तस्मादाहुरदन्तकः पूषा करम्भभाक्'' (6/13)। प्रपिष्टानां चरुः पूष्णे समर्प्यते। सूचनामिमामाधृत्य लेखकेन विस्तरशः कथा लिखिता, यत्र सूचितं यच्छापवशात्केषाञ्चन शिरो भग्नं, केषाञ्चन दन्ताः, किन्तु शङ्करस्य कृपया, क्षमादानेन च अश्विनीकुमारौ सर्वेषाम् अङ्गानां पुनः स्थापनमकुरुताम्। सर्वमिदमपि सूचयति यदद्य दन्तराशेः (डेन्चर) ''प्रतिस्थापनादि'' विज्ञानं यत् प्रचलितं तस्य मूलं प्राचीनतमे भारतेऽपि द्रष्टुं शक्यते।

कथाष्टकेऽस्मिन् धौम्यशिष्यस्य उपमन्योः कथाऽपि वर्णिता, कथमाहारनियन्त्रणादिनाऽप्युपमन्युर्जीवन-यात्राविधिमलभत, धन्वन्तरेः कथाऽपि वर्णिता, कथं संग्रामे पराजितैर्देवैरमृतायाभिलाषः कृतः, कथं पीयूषपूर्णं कलशं दधानो धन्वन्तरिः समुद्रमथनात्प्रादुर्बभूवेत्यादि सविस्तरं प्रस्तुतं, महर्षेश्च्यवनस्य कथापि सविस्तरं वर्णिता, कथं चिरयौवनप्रदायिन्या विद्याया औषधानां च पुरोधाश्च्यवनोऽद्यापि लोकप्रियः (च्यवनप्राशादि-प्रसिद्धमेव), इत्यादि तु देशेऽस्मिन् प्रबुद्धनागरिका विदन्त्येव।

इत्थं हि कथाष्टकं विस्तरेण प्रस्तोतुं लेखकेन पृष्ठभूमिराविष्कृता गुरुशिष्यसंवादस्य। शर्मनामको गुरुः शिष्यान् प्रतिबोधयन् प्राचीनानामायुर्वेदसम्बद्धानां कथानां प्रतिबोधनं तेभ्यः करोति। सोऽयं पञ्चतन्त्र-हितोपदेशादिसम्मतः ''कथाऽभ्यन्तरे कथा''- कथन-विधिरत्र लेखकेन प्रयुक्तः। संस्कृतभाषाप्रावीण्यं प्रेप्सवश्छात्राः कथाष्टकस्यास्योपयोगं कुर्युरिति प्रयोजनपूर्त्यै कथानां प्रस्तुतिरनेन विधिना कृता यत्प्रत्येक-प्रघट्टकस्यानन्तरं तस्य हिन्द्यामनुवादो मुद्रितः, सहैव कठिनशब्दानामर्थादयो मुद्रिताः। इत्थमायुर्वेदस्य, संस्कृतगद्यस्य कथाकथनस्य च त्रिवेणीं प्रवर्तयितुं स्वकीयाभिलाषं ग्रन्थेऽस्मिन् साकारं कुर्वाणो वैद्य बनवारीलालगौडो नूतनमेकं प्रयोगं पुस्तकेऽस्मिन् प्रस्तौतीति प्रमोदास्पदम्।

**आयुर्वेदीयकथाष्टकम्** (हिन्द्यनुवादसहितम्) ले. प्रो. बनवारीलाल गौडः, प्रका. साक्षी पब्लिशिंग हाउस 4/211, मालवीयनगरं, जयपुरम् पृ.सं. 300 मू. 200/-.

## परमानन्दशास्त्रिग्रन्थावली

देहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन (मानित-विश्वविद्यालयेन) निकटेऽतीते उत्कृष्टैर्ग्रन्थैः, प्रमुखतः सजर्नात्मकेन महत्त्वपूर्णसाहित्येन संस्कृत-भारती-भाण्डागारं समेधितवतां मूर्धन्यानां साहित्यकाराणां ''समग्र-ग्रन्थावली-प्रकाशनस्य'' यत् स्तुत्यमभियानं प्रारब्धमभूत् तत्फलस्वरूपं लोकप्रियसाहित्य-ग्रन्थमालायां कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रिणां ''मञ्जुनाथग्रन्थावली'' अन्याश्च ग्रन्थावल्यः, प्रकाशमायाताः। [शास्त्रीयग्रन्थावल्या अन्यस्मिन् प्रकल्पेऽपि ग्रन्थमालाः प्रकाशिताः।] लोकप्रिय-साहित्यग्रन्थमालायामशीतितमपुष्परूपेण सपद्येव सुललितसर्जनात्मकसाहित्यप्रणयनेन सुरभारतीं समर्चितवतामवलीगढस्थानां कविप्रवराणां- पं. परमानन्दशास्त्रिणां ग्रन्थावली प्रकाशमायातेति सुमहतो हर्षस्य विषयः।

पं. परमानन्दशास्त्रिभिः सामयिकानि काव्यान्यपि व्यलेख्यन्त, गद्यरचना अपि, ललितनिबन्धा अपि व्यलेखिषत, उर्दूमहाकवेः ''गालिबस्य'' कृतिसंग्रहस्य समच्छन्दोऽनुवादोऽपि व्यधीयत, बहवोऽन्ये ग्रन्था अपि प्राणीयन्त। सुमहानयं ग्रन्थपूगः। अलीगढस्थानामेव विद्वद्वर्याणां डॉ. सत्यप्रकाशशर्मणां सोऽयं संकल्पोऽभूद् यत्संस्थानस्य तत्कालीनानां कुलपतीनां डॉ. राधावल्लभ-त्रिपाठिनां प्रेरणया ते परमानन्दग्रन्थावलीं सम्पाद-यिष्यन्ति। सत्यप्रकाशशर्माणः पं. परमानन्दशास्त्रिणां

स्नेहमप्यधिजग्मुषोऽभूवन्, अलीगढविश्वविद्यालये संस्कृतविभागाध्यक्षपदमधिष्ठाय सुचिरं विद्याप्रसारानुभवमप्यर्जिजन् एवं च सर्वात्मना पं. परमानन्दानामुत्तराधिकारपात्रमभूवन्।

तैरेव सम्पादिता सेयं ग्रन्थावली पं. परमानन्दशास्त्रिणां रचनाः संगृह्णाति। अत्र हि तेषां महाकाव्यद्वयं जनविजयम् (15 सर्ग, यत्राऽऽपातकालीनाः स्थितयो वर्णिताः), चीरहरणम् (12 सर्ग, यत्राऽऽधुनिकराजनीतेरकाण्डताण्डवादीनां दिग्दर्शनमस्ति), खण्डकाव्यपञ्चकं, भारतशतक-परमानन्दसूक्तिशतकेति शतकद्वयं, अन्योक्तितूणीराख्यः अन्योक्तिसंग्रहः (180 पद्यानि) चत्वारो हृदयावर्जकाः सुललिता मुक्तकसंग्रहाश्च सङ्कलिताः सन्ति। एषामयं विशेषो यन्महाकाव्यानामनन्तरं या रचनाः सङ्कलितास्तासु कवेः स्वोपज्ञः पद्यानुवादो गद्यानुवादो वाऽपि हिन्द्यां सहैव मुद्रितो येन सर्वविधाः पाठका आसां रसास्वादं कर्तुं शक्नुयुः।

स्वरभारतीशीर्षके सुललित-गीतिसंग्रहे 123 सुमधुरा गीतयः सन्ति, आनन्दगीतिकाशीर्षके 15 गीतयः। (आसामनुवादो नाऽस्ति)। प्रारम्भे सम्पादकेन शास्त्रिवर्याणां जीवनपरिचयः, कृतिपरिचयश्च प्रस्तुतः। देवर्षिकलानाथशास्त्रिणाऽपि ''परमानन्दशास्त्रिणां सर्जन कौशलम्'' शीर्षके संक्षिप्ते निबन्धे शास्त्रिणां कृतित्वं समीक्षितमस्ति। प्रधानसम्पादकस्य संस्थान-कुलपतिवर्यस्य प्रो. परमेश्वरनारायणशास्त्रिणः सम्पादकीयमप्यस्ति। सुतरां हृदयावर्जकस्य संग्रहणीयस्य च ग्रन्थसंग्रहस्यास्य हार्दिकं स्वागतं कुर्वाणाः सुभृशं प्रसीदामः।

**परमानन्दशास्त्रिरचनावलिः** - प्रधानसम्पा. प्रो. परमेश्वरनारायणशास्त्री सम्पादकः प्रो. सत्यप्रकाशशर्मा, प्रका. राष्ट्रियसंस्कृतसंस्थानम्, 56-57, इन्स्टीटयूशनल एरिया, जनकपुरी, नई दिल्ली 58, पृ. सं. 900 मू. 720/-.

## आशौचपञ्जिका

जोधपुरस्थजयनरायणव्यासविश्वविद्यालये संस्कृतविभागान्तःस्थापितेन पण्डितमधुसूदनओझाशोधप्रकोष्ठेन वेदविज्ञानेतिहासादिविषयकाः षोडश ग्रन्था यथा प्रकाशितचरास्तथैवाद्यापि प्राकशनकार्यं यथावत् प्रचलतीति हर्षास्पदम्। सद्य एव प्रकोष्ठेनानेन पं. मधुसूदन ओझामहाभागैः प्रणीता आशौचपञ्जिका हिन्द्यनुवादेन सह सम्पाद्य प्रकाशिताऽस्ति। सम्पादकोऽनुवादकश्चास्ति संस्कृतविभागाध्यक्षः प्रो. सत्यप्रकाशदुवेवर्यः। आशौचपञ्जिकायाम् ओझामहाभागैः मरणोत्तरकर्मणां, दाहविधीनाम् आशौचनिर्णयस्य, उत्तरक्रियाधिकारस्यान्येषां च समस्तानां सम्बन्धानां विषयाणां विवेचनं कृतमस्ति। सनातनधर्मानुयायिषु ''मरणोत्तरकृत्यानि कथं कुत्र केन विधिना कैः कैः कर्तव्यानीति'' विषये सर्वदा जिज्ञासा जागर्ति स्म। तान् सर्वान् सापिण्ड्यनिर्णयं च विवेचयितुम् अध्यायदशके सोऽयं ग्रन्थो व्यलेखि ओझामहोदयैर्यत्र नवस्वध्यायेषु संस्कृते विवेचनं निर्णयाश्च सूचिताः दशमेऽध्याये धर्मशास्त्रग्रन्थानां (स्मृत्यादीनां) प्रमाणान्युद्धृतानि येषामाधारेण विवेचनं प्रस्तुतमस्ति।

सम्पादकेनानुवादकेन च दुबेमहाभागेन समग्रस्यापि ग्रन्थस्याऽनुवादो मूलेन सहैव प्रतिविषयं प्रत्यध्यायं प्रस्तुतः। सर्वेषां स्मृतिग्रन्थोद्धरणानामपि प्रतिपद्यमनुवादः कृतोऽस्तीति सर्वमिदं ग्रन्थस्य संग्रहणीयतामेधयति। प्रकोष्ठेनानेन वेदविज्ञानविषयकाः (कादम्बिनी-महर्षि कुलवैभव-दशवादरहस्यादयः) इतिहासविषयकाः (इन्द्रविजयाः) अन्ये चापि पं. मधुसूदनओझा प्रणीता ग्रन्था यथा प्राकाशिषत, तथैव धर्मशास्त्रविषयकमिमं ग्रन्थं प्रकाश्य व्यापकस्य वाङ्मयफलकस्य प्रातिनिध्यमधुना सूचितमिति विज्ञाय प्रमोदेरन् सुधियः।

**आशौचपञ्जिकाः** ले. श्री मधुसूदन ओझा अनुवादकः सम्पादकश्च प्रो. डॉ. सत्यप्रकाश दुबे प्रका. पंडितमधुसूदन ओझा शोधप्रकोष्ठः संस्कृतविभागः जयनारायणव्यासविश्वविद्यालयः जोधपुरम् पृ.सं. 360 मू. 550/-

श्रीमतां बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

# अष्टादशः प्रसङ्गः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

श्रीधरभास्करवर्णेकरमहोदया एवाग्रे वर्णयन्ति- आधुनिकसंस्कृतसाहित्यविषये विस्तृतः सर्वाङ्गीण-विवरणप्रदर्शको ग्रन्थोऽपि तैर्मया लेखायित एव। एतादृशग्रन्थस्य कल्पना यथैव तेषां मनसि समागता ते ममाग्रहे संलग्नाः। अन्ते च तेषामाग्रहेण मया नागपुर-विश्वविद्यालयतः शोधकार्यार्थं विषयोऽयं स्वीकारितः। विश्वविद्यालयेन विषयेऽस्मिन् मार्गदर्शनार्थं ''डा. राघवन्'' महोदयाः नियोजिताः। तैः मह्यमावश्यकता-नुसारं सूचनाः प्रदत्ताः। परं सत्यं तु मम मार्गदर्शनं बाबा महोदयैरेव कृतम्। तेषां समीपे यद्यपि केनापि विश्वविद्यालयेन प्रदत्तः शोधापाधिर्नासीत् तथापि ते एव मे सत्यसहायकाः मार्गदर्शकाश्चासन्। प्रवासादागत्यैव नागपुरे ते मां प्रश्नादिकं कुर्वन्ति स्म, मया लिखितं पठन्ति स्म। आधुनिकं संस्कृतसाहित्यमपि यद्यपि समग्रे देशे पर्याप्तमस्ति, अथापि बहुमात्रं तद् दुर्लभमस्ति। परं बाबामहोदयाः सम्पूर्णदेशस्य प्रवास-समये एतादृशसाहित्यस्य मदर्थे संकलने सावधानाः आसन्। तेषां हस्ते यदपि पुस्तकं प्राप्तं स्यात्ते मह्यमानीय प्रयच्छन्ति स्म। नैतावदेव मम ग्रन्थे पूर्णे जाते सति, तस्य प्रकाशनस्या पि चिन्ता तेभ्य एव।

अस्मिन् प्रसङ्गे एको विषयोऽवश्यमेव वर्णनीयः। ग्रन्थनिर्माणकार्ये पूर्णे जाते सति, मया तानपृष्ट्वैवान्ते उमाकान्त-केशवोपाख्याय बाबासाहेबआप्टे महोदयाय परमश्रद्धापूर्वकं समर्प्यत इतिवाक्यमुद्धृतम्। यदा ग्रन्थो मुद्रितः तस्य च प्रथमां प्रतिमादायाहं तेषां संमुखे गतः, तेषां प्रसन्नतायाः वर्णनमशक्यमेव। परं यथैव तैर्ग्रन्थोद्घाटनं कृतं प्रथमपृष्ठे एव समर्पणविषयेऽङ्क-नमवलोकितं गम्भीरमुद्रया तैः कथितम् अधुना किं भवेत्? किं भवान्नैव जानाति समर्पणविषये पूर्वानुमतिरवश्यं ग्रहीतव्येति। अहमवदं नियमं त्वहं जानामि परमहमेतदपि जानाम्यनुमतिं भवान् नैव दास्यति पुनश्च किं स्वपित्रे समर्पणविषये लिखितानुमतिरावश्यकी मयैवमुक्ते ते तूष्णीमभवन्।

## कारागारेऽपि संस्कृतप्रचारः

घटनेयं 1949 तमस्य वर्षस्यास्ति, रायपुरकारागारे स्व. श्री वत्सराजव्यासेन, स्व. श्रीबालशास्त्रिणा हरदासेन, स्व. श्रीशंकररावडबीरेण, स्व श्री भाऊ-साहेबखरेमहोदयेन च सह मिलित्वा एकस्य संस्कृतमण्डलस्य स्थापना विहिता। संस्कृतभाषायां वार्तालापस्य च कार्यक्रमः प्रारब्धः। कतिपयदिवसेष्वेव एवं दृश्यते स्म यत् कारागारे एव संस्कृतमहाविद्यालयः स्थापितः स्यात्। श्रीमतां बाबामहोदयानामाग्रहेणैव बालशास्त्रिहरदासेन सावरकरमहोदयानां प्रसिद्धमहा-काव्यस्य गोमान्तकस्य संस्कृतपद्यानुवादः प्रारब्धः।

कारागाराद् बहिराग मनसमकालमे बाबामहोदयेन मया एकं नूतनं व्रतं स्वीकर्त्तुमाग्रहः कृतः। व्रतमिदं सर्वदैव संस्कृतभाषणस्यासीद्। व्रतमिदं मया 1950 वर्षतः 1962 पर्यन्तं द्वादशवर्षं यावन्निष्ठापूर्वकमङ्गी-कृतम्। परं बाबामहोदयाः नैतावता सन्तुष्टाः। एकस्मिन् दिने तैरहमाहूतः। कथितञ्च-संस्कृतस्य प्रचारार्थं संस्कृतवृत्तपत्रं नागपुरतः प्रकाशितं स्यादित्यावश्यकम्। अहमवदं-भवत्कथनं तु सत्यं परं क एतां घण्टिकां कण्ठे बध्नातुं शक्नोति। तत्कालमेव बाबामहोदयेनोक्तं त्वं त्वं कोऽन्यः? त्वयैव नागपुरतः संस्कृते साप्ताहिकं वृत्तपत्रं प्रकाशनीयम्। अहमवदं परं बाबामहोदय! संस्कृते साप्ताहिकं वृत्तपत्रं प्रकाशयितुं मयि क्षमतैव क्व? द्रव्यं कुत आगमिष्यति? द्रव्यस्य नाम श्रुत्वैव प्रकुप्य बाबामहोदयेनोक्तं-द्रव्यं नास्ति चेद् यदि भिक्षा याचनीया भवेद् याचनीया। कस्मैचिच्छ्रेष्ठ-कार्यार्थं याञ्चायां का आपत्तिः? पुनरपि मां मौनीभूतम् अवलोक्योच्चस्वरेण तैः कथितं यदि संस्कृतसाप्ताहिकं भवता न प्रकाशितमहमनशनं करिष्यामि।

अस्मिन् सम्बन्धे बाबामहोदयानामिच्छाशक्ति-रियती प्रबला आसीत्। मासत्रयाभ्यन्तर एव मम सम्पादकत्वे संस्कृतसाप्ताहिकस्य ''भवितव्या त्याख्यस्य'' प्रकाशनमारब्धम्।

---

**प्रेरकप्रसङ्गशतकम्** **चत्वारिंशःप्रसङ्गः**

# अज्ञातपत्युर्दूरभाषसंदेशः

❑ **मा. श्रीमती आराधना धर्माधिकारी**

एका महिला भूपालनगरे स्वं पूर्वमायतनं त्यक्त्वा सद्य एव नवीनं सुविधापूर्णं भवनम् आगतवती। एकाकिनी सा स्वयमेव स्वं सर्ववस्तुजातं यथास्थाने संयोज्य सुषुप्ता। सहसा द्वारे गृहस्वामिन्या खटखटायितम्। निद्रायामेव तया द्वारमुद्घाटितम्। मोहिनि! ते दूरभाष-संदेशः। सा विस्मिता मयात्रत्या दूरभाषाङ्काः न कस्मै अपि प्रदत्ताः। संदेशः कस्य नाम भवेत्? अथापि तया दूरभाषयन्त्रमादायोक्तं-हरिओम्, केन वार्त्ता करणीयास्ति ? तेनोक्तं मोहिन्या सह। को भवान्? गंभीरध्वनावुत्तरं प्राप्तं-ते पतिः। सा त्वविवाहितासीत्, कोपेन त्वरितं दूरभाषः-विच्छेदः कृतः चिन्तामग्ना चाभूत्-कोऽयं मां त्रासयति पीडयति च? कोपेन तथैव गत्वा सुषुप्ता। किञ्चित्क्षणानन्तरमेव गृहस्वामिनी पुनरायाता-भगिनि! क्षमस्व मां न स सन्देशस्ते अपितु मद्भृत्याया मोहिन्याः पत्युःआसीत्। प्रायः स नैव प्रेषयति अतो मया ते स्यादिति विचारितम्। उभे चिरमहसताम्। अद्यापि तत्संस्मरणे हास्यं प्रस्फुटति। नाम-सादृश्यात् शकुन्तलावण्यमिव भ्रान्तिर्भवति।

# वाल्मीकिरामायणे जीवनदर्शनम्

❑ ओमप्रकाश दोतानिया

अस्मिन् जगति नाना प्राणिनो निवसन्ति। ते सर्वे आत्मनोऽस्तित्त्वाय परस्परमाश्रयं प्राप्नुवन्ति। सर्वे परस्परं सहयोगं कुर्वन्ति। सर्वेषां जीवने पर्यावरणस्य प्रभावोऽत्यधिको भवति। सर्वेषु जीवेषु मानवः सर्वाधिकः समुन्नतः प्राणी वर्तते। यस्मिन् पर्यावरणे सामाजिकपरिवेशे च बालकस्य जन्म भवति तज्जीवने परिवेशस्य प्रभावो दरीदृश्यते। तेनैव नवजातस्य जीवनविकासो भवति। प्रतियुगं समाजे देशकालानुसारेण काश्चनावधारणाः मानवेभ्यः स्वीकरणीयाः भवन्ति। एतासु अवधारणासु धर्मसत्यदयाक्षमादानमैत्रीभाग्य-पुरुषार्थविद्याऽचाराहारविचारपरिधानमनोविनोद-संस्कारादयः सर्वे मिलित्वा तद्युगीनजीवनदर्शनस्य निर्माणं कुर्वन्ति। जीवनदर्शनं जीवनस्यैतादृशो दर्पणोऽस्ति यत्र समग्रं जीवनं द्रष्टुं शक्यते। जीवनस्य अयमेव विकासो मन्यते। महर्षिवाल्मीकिरामायणे तत्कालीनजीवनस्य नानाऽऽआधारभूतानि तत्त्वानि प्रस्फुटितानि संबभूवुः। यैः तद्युगीनमानवजीवनस्य विकासक्रमो द्रष्टुं शक्यते। रामायणे मर्यादापुरुषोत्तमस्य रामस्यादर्श चरितं समुपलभ्यते। भगवतो विष्णोरवतारस्य रघुकुलश्रेष्ठस्य रामस्याद्भुतं जीवनदर्शनमत्र दृश्यते। अस्य विलक्षणजीवनदर्शनस्य प्रभावो रामायणकाला-दद्यावधिपर्यन्तमपि भारतवर्षे मानवसमाजे द्रष्टुं शक्यते। धर्मज्ञसत्यप्रतिज्ञसानुक्रोशजितक्रोधब्राह्मणप्रतिपूजक-दीनानुकम्पी नित्यप्रगृह्यवान् शुचिर्विद्वान् वीर्यवान् प्रियंवदसदाचारी-इत्यादिगुणगरिष्ठस्य रामस्यादर्श-जीवनं न केवलं भारतवर्षे अपितु सम्पूर्णजगति सुविख्यातं वर्तते। रामस्य पिता धर्मात्मा महाराजदशरथः, भ्रातरो भरत-लक्ष्मण-शत्रुघ्नाः, भार्या जनकसुता सीता, सखा विभीषणः, सेवको मारुतात्मजः, कुलुगुरुर्वशिष्ठः, गुरुर्विश्वामित्रः, रिपुः लंकेश्वरो-रावण इत्यादीनां पात्राणां जीवनचरिते रामायणयुगीन-जीवनदर्शनं द्रष्टुं शक्यते। तत्कालीनजीवनमूल्येषु धर्मसत्यदयाक्षमादानमैत्री-प्रतिज्ञा-पालनशरणागतरक्षा-भाग्यवादसदाचारपुरुषार्थ-पालनादीनां तत्त्वानां सम्यक् विवेचनं रामायणे सम्प्राप्यते-

एतेषु जीवनमूल्येषु धर्मविमर्शो यथा-

**धर्मः** -

धृधातोः मन् प्रत्ययेन निष्पन्नस्य धर्मशब्दस्यार्थोऽस्ति ध्रियते लोकोऽनेनेति धर्मो वा धरति लोकमिति धर्मः। अभ्युदयनिःश्रेयससाधको गुणकर्मसमूहो धर्मः। अथवा अहिंसासत्याग्निहोत्रेत्यादिगुणकर्मसमूहो धर्मः। ईश्वरनिष्ठा, सेवा, भक्तिः, आस्तिक्यबुद्धिः, पुण्यम्, परोपकारः, सदाचारः, साधुता, सुकृतं, सत्कर्म, नयः, न्यायः, नीतिः, ऋजुता, प्रभृत्यादयो धर्मसमानार्थकाः शब्दाः सन्ति।

धर्मस्य विषये महर्षिणा मनुनोक्तं-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः**
**एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्।मनु. २/१२**

धर्मस्य लक्षणं महर्षियाज्ञवल्क्येनोक्तं-

**धृति क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**

धर्मं विना सामाजिकजीवनं नास्ति सम्भवम्। जीवजगति धर्मस्य महदुपयोगिता वर्तते। जीवनस्य अस्तित्वं धर्मेणैव संभवम्। धर्मो हि सर्वेषां प्राणिनां जीवनस्य सारभूततत्त्वं वर्तते। विशेषतो धर्महीनमानव-समाजस्य तु कल्पनामपि कर्त्तुं न शक्नोति। धर्मेणैव मानवजीवनं परिपूर्णतां प्राप्नोति। धर्मो हि विश्वस्य जगतः प्रतिष्ठा वर्तते। धर्मेणैव सर्वे सुरक्षिताः सन्ति। देशकालखण्डानुसारेण धर्मस्य नाना रूपाणि द्रष्टुं शक्यन्ते। वैदिककालानन्तरम् महर्षिवाल्मीकि-विरचितादिकाव्य-रामायणे धर्मस्याद्भुतं विवेचनं प्राप्यते। रामायणकाले मानवजीवनमूल्येषु धर्मस्य महत्त्वपूर्णं स्थानमासीत्। धर्मेणैव जीवनं जीवन्ति स्म। धर्मात्मनो महाराजदशरथस्य मूलनगर्यामयोध्यायां सर्वे नागरिका धर्मात्मान आसन्। रामायणे प्रतिपादितं यथा-

**तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः।**
**नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः।।**
**वा.रा. १/६/६**

**नाल्पसंनिचयः कश्चिदासीत् तस्मिन् पुरोत्तमे।**
**कुटुम्बी यो ह्यसिद्धार्थोऽगवाश्वधनधान्यवान्।।**
**वा.रा. १/६/७**

**कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित्।**
**द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः।।**
**वा.रा. १/६/८**

**सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः।**
**मुदिता शीलवृत्ताभ्यां महर्षय इवामलाः।।**
**वा.रा. १/६/९**

**नानाहितागार्नायज्वा न क्षुद्रो वा न तस्करः।**
**कश्चिदासीदयोध्यायां न चावृत्तो न संकरः।।**
**वा.रा. १/६/१२**

धर्मज्ञस्य महाराजदशरथस्य सर्वाः प्रजाः सर्वदा धर्मेणैवाचरणं कुर्वन्ति स्म। धर्महीनं जीवनं श्रेयस्करं न मन्यते स्म। रामायणे यथोक्तं-

**नाषडंगविदत्रास्ति नाव्रतो नासहस्रदः।**
**न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन।।**
**वा.रा. १/६/१५**

**कश्चिन्नरो वा नारी वा नाश्रीमान् नाऽप्यरूपवान्।**
**द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान्।।**
**वा.रा. १/६/१६**

रामायणकालीनमान्यतानुसारेण धर्मादर्शः प्रभवति। धर्मादेव सुखं प्रभवति। मानवीवने पुत्रपौत्रादिधन-सम्पत्तयः सर्वा धर्मेर्णव लभ्यन्ते। धर्मो हि विश्वस्य जगतः सारो वर्तते। त्रिवर्गेषु धर्मो हि प्रमुखो मन्यते। यथोक्तं-

**धर्मादर्शं प्रभवति धर्मात् प्रभवते सुखम्।**
**धर्मेण लभ्यते सर्वं धर्मसारमिदं जगत्।।**
**वा.रा. ३/१/३०**

राजा राजपुरुषो वा धर्मं विज्ञाय तदनुरूपं कर्म न करोति स्म, तेनाधीतं सर्वं शास्त्रज्ञानं व्यर्थमासीत्। रामायणकाले जीवने धर्मविरुद्धमाचरणं न स्वीकरोति स्म। धर्मस्य स्थानं प्राणेभ्योऽप्युपरि मन्यते स्म। सर्वे जनाः स्वस्य स्वस्य धर्मस्य पालनं कुर्वन्ति स्म। धर्माचरणादुत्पन्नपुण्यकर्मभिर्लोकजीवने नराः समृद्धि-रूपषलपुत्रशुत्वं च प्राप्रूवन्ति स्म। यथा रामायणे प्रतिपादितं-

**त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते।**
**राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम्।।**
**वा.रा. ६/६३/१०**

**ऋद्धिं रूपं बलं पुत्रान् वित्तं शूरत्वमेव च।**

**प्राप्नुवन्ति नरा लोके निर्जितं पुण्यकर्मभिः।।**
**वा.रा. ७/१५/२६**

रामायणकालीनयुगे केवलमयोध्यावासिनो जना एव न अपितु सम्पूर्णभारतवर्षे सर्वे नरवानरऋक्षादयो धर्मविरुद्धमाचारं न स्वीकुर्वन्ति स्म। धर्मादुन्नतिं प्राप्नोति। अधर्मेण नाशं प्राप्नोति। यथोक्तं-

**त्यजाशु कोपं सुखधर्मनाशनं भजस्व धर्मं रतिकीर्तिवर्धनम्।**
**प्रसीद जीवेम सपुत्रबान्धवाः प्रदीयतां दाशरथाय मैथिली।।**
**( वा.रा. ६/१/२२ )**

**धर्माद् राज्यं धनं सौख्यमर्थाद् वा दुःखमेव च।**
**तस्माद् धर्मं सुखार्थाय कुर्यात् पापं विसर्जयेत्।।**
**( वा.रा. ७/१५/२ )**

सुमहाप्रज्ञो माल्यवान् नामको राक्षसोऽपि अधर्मेण महाविनाशं विज्ञाय रामेण सह सन्धिं कर्तुं रावणं निवेदयति। तेनोक्तं-

**तत् त्वयाचरता लोकान् धर्मोऽपि निहतो महान्।**
**अधर्मः प्रगृहीत श्च तेनास्मद् बलिनः परे।।**
**वा.रा. ६-३५-१५**

**सप्रमादात् प्रवृद्धस्तेऽधर्मोऽहिर्ग्रसते हि नः।**
**विवर्धयति पक्षं च सुराणां सुरभावनः।।**
**वा.रा. ६-३५-१६**

**कुरुष्व नरराजेन संधिं रामेण रावण।**
**ज्ञात्वावधार्य कर्माणि क्रियतामायतिक्षमम्।।**
**वा.रा. ६-३५-३६**

सुखाय धर्मपालनं कर्त्तव्यम्। अधर्मेण तु केवलं दुःखमेव प्राप्यते। अतः पापं विसर्जयेदिति धनपतिना कुबेरेणापि राक्षसेश्वरो, लंकेश्वरो रावणः सीतायाः समक्षं कथितः। सीताया अपि धर्मं प्रति दृढविश्वास आसीत्। अतः सा सम्यक् जानाति स्म यत् अधर्मेण लंकायामवश्यमेव रक्षःकुलनाशो भविष्यति। यथोक्तम्-

**अधर्मात् तु महोत्पातो भविष्यति हि साम्प्रतम्।**
**नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः।।**
**( वा.रा. ५-२६-३४ )**

साक्षात् धर्मस्य मूर्त्तिः रघुकुलनायकः श्रीरामो ब्राह्मणोत्तमाय जाबालये धार्मिकमर्यादाम् अवबोधयत्। तेनोक्तं यत् यः पुरुषो धर्मस्य मर्यादां विहाय पापाचारं करोति, सः जनः साधुजनेषु कदापि सम्मानं न लभते। तस्य जीवनं सुखरहितं निरर्थकं भवति। सः जन आत्मानं हीनं मनुते। यतो हि सदाचारेणैव मनुष्यः आत्मशुद्धिमशुद्धिं वा प्राप्नोति। यथोक्तं-

**निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः।**
**मानं न लभते सत्सु भिन्नचारित्रदर्शनः।।**
**( वा.रा. २-१०१-३७ )**

**कुलीनमकुलीनं वा वीरं पुरुषमानिनम्।**
**चारित्रमेव व्याख्याति शुचिं वा यदि वाशुचिम्।।**
**( वा.रा. २-१०१-३८ )**

वने शूर्पणखया परिचये पृष्टे सति धर्मज्ञेण रामेण सरलस्वभावेन धर्मो हि पालनीय इति कथितम्।

**नियोगात् तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः।**
**धर्मार्थं धर्मकांक्षी च वनं वस्तुमिहागतः।।**
**( वा.रा. ३-१७-१७ )**

पितुराज्ञापालनाय वनगमनाय च दृढनिश्चयो धर्मात्मा रामो रोषेण संतप्तमानसं लक्ष्मणं दीनां विलपन्तीं जननीं कौशल्यां च धर्मसहितं वचनमुवाच। हे मातः! पितुराज्ञा-पालनमेव मम धर्मोऽस्ति। पुरा महर्षिणा कण्डुना पितुर्वचनं स्वीकृत्य गोहत्या कृता। जमदग्निपुत्रेण परशुरामेण पितुर्वचनस्य पालनाय परशुना वने जनन्याः रेणुकायाः शिरच्छेदनं कृतम्। पितुर्महाराज सगरस्याज्ञया

पृथ्वीं खनित्वा सगरसुताः मृत्युं प्राप्तवन्तः। पितुर्हि वचनं स्वीकुर्वन् कोऽपि पुरुषो धर्मच्युतो न भवति। यतो हि लोके धर्मः श्रेष्ठतमं कर्म वर्तते। यथोक्तं-

**धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।**
**धर्मसंश्रितमप्येतत् पितुर्वचनमुत्तमम्।। २-२१-४१**
**संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा।**
**न कर्त्तव्यं वृथा वीरधर्ममाश्रित्य तिष्ठता।। २-२१-४२**

रघुकुलनायको रामः स्वानुजं सुमित्रानन्दनं कोपं विहाय धर्मस्य आचरणायोपदिशति। तेनोक्तं यत् यो जनो धर्मेण जीवति स एव पूर्वजन्मकृतपुण्यफलानि प्राप्नोति। अतो यस्मिन् कर्मणि चतुर्वर्गस्य समावेशो न स्यात् तत् कर्म न कुर्यात्। धर्मेणैव मानवस्य रक्षा भवति। अधर्मस्य शीघ्रं नाशो जायते। अतो येन कर्मणा धर्मस्य सिद्धिर्भवति। तेनैवारम्भः करणीयः। यथोक्तं-

**धर्मार्थकामाः खलु जीवलोके समीक्षिता धर्मफलोदयेषु।**
**ये तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा।**
**वा.रा.२-२१-५७**
**यस्मिंस्तु सर्वे स्युरसंनिविष्टा धर्मो यतः स्यात् तदुपक्रमेत।**
**द्वेष्यो भवत्यथपरो हि लोके कामात्मता खल्वपि न प्रशस्ता।।**
**वा.रा.२-२१-५८**

रामसुमित्रानन्दनं लक्ष्मणं गुरुराजपितृवृद्धानामाज्ञा-पालनमेव धर्मं मत्वाऽऽचरेदिति उपदिशति। यथोक्तं-

**गुरुश्च राजा च पिता च वृद्धः क्रोधात् प्रहर्षादर्थवापि कामात्।**
**यद्यादिशेत् कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्ति।**
**वा.रा.२-२१-५९**

लंकेश्वरेणापहृता सीता वने रामस्याह्वानं कुर्वाणा इदमेवोक्तवती यत् धर्मरक्षायै जीवनं सुखमर्थं च परित्यजन् अधर्मेण नीयमानां मां राघवः कथं न पश्यति? यतो धर्मरक्षैव रामजीवनस्य मुख्यमुद्देश्यं विद्यते। यथा-

**जीवितं सुखमर्थं च धर्महेतोः परित्यजन्।**
**ह्रियमाणामधर्मेण मां राघव न पश्यसि।।**
**वा.रा. ३-४९-२५**

इक्ष्वाकुवंशप्रभवो रामो धर्मं हि प्रधानं वस्तु मनुते स्म। धर्मरक्षार्थं सः हिमवानिव अचलः स्थितो दृश्यते। उक्तम्-

**अथानुपूर्व्यां प्रतिपूज्य तं जनं गुरुश्च मन्त्रीन् प्रकृतस्तमानुजौ।**
**व्यसर्जयद् राघववंशवर्धनः स्थितः स्वधर्मे हिमवानिवाचलः।।**
**वा.रा. ६-१४-२२**

**शोधच्छात्रः**
**ज.रा.रा.संस्कृतविश्वविद्यालयः, जयपुरम्**

# ।। गीतम् ।।

❑ **परमानन्दशर्मा ''प्रमोदः''**

**वदामि जय जय भारतम्। पठामि नित्यं संस्कृतम्।।**
**शरीरमेतद् भारतम्। प्राणाश्चास्मिन् संस्कृतम्।।**
**वाणी चैषा भारतम्। तात्पर्यार्थः संस्कृतम्।।**
**गङ्गायमुने भारतम्। शीतलनीरं संस्कृतम्।।**
**सर्वे गिरयो भारतम्। मलयजगन्धः संस्कृतम्।।**
**काव्यमखिलं भारतम्। भगवद्गीता संस्कृतम्।।**
**मानप्रतिष्ठे भारतम्। मनसि श्रद्धा संस्कृतम्।।**
**विविधसभ्यता भारतम्। संस्कृतिरेका संस्कृतम्।।**
**सर्वाः भाषाः भारतम्। संस्कृतभाषा संस्कृतम्।।**

**रा.उ.मा.वि. आगूँचा, जिला-भीलवाड़ा**

# वर्तमाने याज्ञवल्क्यस्मृतेः प्रासङ्गिकता

❑ श्रीमती कविता मीणा

वेदाः भारतीयसंस्कृतेः आधारभूताः सर्वश्रेष्ठाः ग्रन्थाः सन्ति। वैदिकवाङ्मयस्य एते तादृशाः सुधासरोवराः सन्ति, येषु विविधप्रकाराणां शास्त्राणां साहित्यस्य कलानां च कुल्याः प्रवहन्ति। भारतीयसमाजे विश्वासोऽयमनादिकालात् प्रवर्तते यत् वेदाः कस्यचिद् मानवमस्तिष्कस्य उत्पत्तिः न अपितु ते ईश्वरीयाः ज्ञानस्वरूपाः सन्ति। मानवसृष्टेः प्रारम्भे त्रिकालज्ञाः ऋषयः स्वकीयैः दिव्यचक्षुभिः नभसि अव्यक्तनादस्य तरंगान् भ्रमतः अपश्यन्, तैः नादैः ये शब्दाः निर्मिताः तैरेव श्रुतयः आविर्भूताः। एतेषामेव वेदानां विस्तारः विकासश्च स्मृतिषु अस्माभिः प्राप्यते। समाधिस्था ऋषयः वेदानां नित्यनूतनान् अर्थान् अस्मरन् तान् च स्मृतिषु स्वशब्दैः प्रकटितवन्तः।

सम्प्रति भारतीयसमाजे यानि धार्मिकविधानानि दृष्टिपथे अवतरन्ति, तेषां सर्वेषां विवेचनम् अस्मदीयेषु यथावत् उपलभ्यते। समस्ते प्राचीनवाङ्मये यथा ब्राह्मणग्रन्थेषु, आरण्यकेषु, उपनिषत्सु, धर्मसूत्रेषु रामायणमहाभारतादिकाव्येषु च सर्वत्रैव धर्मस्य व्याख्या कृतास्ति। एतेषु ग्रन्थेषु विषयान्तरैः सह धर्मस्यापि चर्चा वर्णिता। किन्तु, स्मृतिषु विवेचनस्य मूलाधारः एव धर्मः। मानवस्य समाजस्य च आचारशुद्धता, व्यवहारस्य पवित्रता, व्यवस्थायाः पापशून्यता येन विधिना भवेत्, तेन प्रकारेण धर्मस्य सत्यस्य च विवेचनम् आसां स्मृतीनाम् उद्देश्यम्। धर्मशास्त्रस्य इतिहासमनुसृत्य स्मृतीनां संख्या प्रायः शतं स्वीकृता, किन्तु अधिकांशतः विद्वांसः एतासु शतसंख्याकासु स्मृतिषु अद्यत्वे मनोः याज्ञवल्क्यस्य च एते एव द्वे स्मृती[1] प्रधानत्वेन स्वीकुर्वन्ति। सर्वासु एतासु स्मृतिषु अद्यत्वे मनोः याज्ञवल्क्यस्य च एते एव द्वे स्मृती सर्वे स्वीकुर्वन्ति। एवं ते स्मृती सर्वाधिके विख्याते स्तः। स्मृतिसाहित्ये मनुस्मृतेः स्थानं निर्विवादरूपेण सर्वोच्चमस्ति एव, किन्तु तदनन्तरं यदि काचित् स्मृतिः सर्वाधिका महत्त्वपूर्णा अस्ति तदा सा याज्ञवल्क्य-स्मृतिरेव।

महर्षिणा याज्ञवल्क्येन प्रणीता स्मृतिः इयं भारतीयानां हृदि प्रतिमा इव प्रतिष्ठिता। स्मृतिरियम् आचारव्यवहारप्रायश्चित्ताख्यैः त्रिभिः अध्यायैः विभक्ता अस्ति। अस्याः स्मृतेः रचना शुक्लयजुर्वेदस्य ज्ञाना-नुशासनस्य नियमानुशासनस्य च परम्परायां कृता। अत्र तात्कालिकस्य समाजवर्तिनः स्वरूपस्य तस्य समुचिताचरणस्य विविधपक्षाणां विस्तारपूर्वकं वर्णनं कृतमस्ति। अस्याः रचना व्यावहारिकतां ध्यात्वा कृता। यवनानाम् आगमनात् पूर्वं देशस्य अधिकतरभागेषु राजकीयविधीनाम् आधारा इयमेव स्मृतिः मन्यते स्म। हिन्दुधर्मशास्त्रस्य सन्दर्भे अद्यापि भारतीयन्यायालयेषु एषा स्मृतिः एव प्रामाण्यत्वेन स्वीक्रियते। उच्चतमन्यायालये अनेकविवादानां निर्णयेषु अस्य ग्रन्थस्य सन्दर्भाः गृहीताः। अतः परम् अत्र याज्ञवल्क्यस्मृतौ मानवमात्रस्य कल्याणार्थं शाश्वतसत्यस्य सनातनधर्मस्य च अनुष्ठानानां दिव्यसन्देशाः अपि विद्यन्ते, येषाम् अनुष्ठानात् मानवः अभ्युदयं निःश्रेयसं च प्राप्नोति। अत्र मानवजीवनस्य ते सर्वे आवश्यकाः भावाः वर्णिताः, येषु जीवनस्य सर्वेगतिविधयः निर्भराः सन्ति। ग्रन्थेऽत्र अनेकविधाः व्यवस्थाः तथा सन्ति याः वर्तमानयुगे अपि पूर्णतया प्रासङ्गिकाः विधिव्यवस्थापिताः अनुकूलाः च विद्यन्ते। याज्ञवल्क्यस्मृतिप्रतिपादिता एताः विविध-व्यवस्थाः सम्प्रत्यपि मानवसमाजम् आचारवन्तं, चरित्रवन्तं, व्यावहारिककर्तव्यनिष्ठं च कर्तुं प्रेरयन्ति।

याज्ञवल्क्यः सदाचरणम्, आत्मानुकूलकार्यं, विवेकपूर्णसंकल्पोत्पन्नाः इच्छाः च धर्मस्य मूलतत्त्वरूपेण स्वीकृतवान् तथा आचारम् इन्द्रियनिग्रहम्, अहिंसा, दानं स्वाध्यायं योगश्च श्रेष्ठधर्मत्वेन अङ्गीकृतवान्।[2] महात्मागान्धि-महोदयः स्वाधीनतासंग्रामे अहिंसाम् अस्त्ररूपेण प्रयुज्य निखिलं विश्वम्अद्भुतम् अभूतपूर्वं च अभिनवं मार्गं प्रादर्शयत्। स च अहिंसाख्यः स्मृतिप्रतिपादितः अनुकरणीयः प्रमुख धर्मः अचिरादेव विश्वविदितेन वयोवृद्धेन प्रमुखेणः समाजसेवकेन अन्नाहजारेनामधेयेन महात्मनापि लोकपालाख्यं विधेयकं व्यवस्थापयितुं नवदिल्ली-स्थरामलीलाक्षेत्रे येन प्रकारेण इदं महात्मागान्ध्य-नुमोदितम् अहिंसाख्यम् अस्त्रं प्रयुक्तं, तत् जगत्यस्मिन् अद्वितीयं कार्यमासीत्। वर्तमानयुगे भारते एव न अपितु सम्पूर्णे संसारे मानवस्य मानवता अधः पतन्ती अस्ति, नैतिकतायाः स्थाने अनैतिकता, सदाचारस्य स्थाने भ्रष्टाचारः च विराजते। इदानीं मानवस्य हृदि प्रेमवात्सल्यस्नेहसदृशानां पवित्रशब्दानां कृते किमपि स्थानं नास्ति, तद्विपरीतक्रमेण क्षणभंगुरैः वस्तुभिः मनुष्यस्य मोहः एतावान् प्रवृद्धः यस्मात् अद्य प्रतिगृहं, प्रतिनगरं, प्रतिराज्यं, प्रतिराष्ट्रं विद्रोहसदृशाः दशाः उत्पन्नाः। बालकाः पित्रोः सम्मानं न कुर्वन्ति। धनलुब्धः भ्राता सहोदरं हन्ति, सर्वत्रैव लुण्ठनस्य बलादपहरणस्य वातावरणम् अस्ति। नित्यं नवाः नवाः भ्रष्टाचाराः पुरतः आयान्ति। सर्वेषाम् एतेषां संकटानां, विप्रतिपत्तीनां, धर्मविरूद्धभ्रष्टाचाराणां च मूलं कारणमेतदेव यत् स्मृतिकारैः येषां धर्मतत्त्वानां प्रतिपादनं कृतं तानि धर्मतत्त्वानि वैज्ञानिकयुगस्य साम्प्रतिकमानवेन त्यक्तानि। यदि अद्य राजनेतारः प्रजाः अधिकारिणः कर्मचारिणश्च याज्ञवल्क्यस्मृतिप्रतिपादितं धर्मतत्त्वं मनसा वाचा कर्मणा च आत्मसात् कुर्युः, तर्हि समाजस्य सम्पूर्णरूपेण विकासः उत्थानं च सम्भविष्यति। अतः सुस्पष्टं यत् धर्मस्य एतानि तत्त्वानि अद्यापि पूर्णरूपेण प्रासङ्गिकानि तु सन्त्येव अपितु अद्य एतेषाम् आवश्यकता पूर्वतः अपि अधिका अस्ति।

याज्ञवल्क्यः राजधर्मप्रकरणे राजकर्मचारिणां कृते कठोरदण्डस्य विधानं कुर्वन् उल्लिखितवान् यत् राज्यकार्ये अधिकारयुक्तपदेषु नियुक्तानाम् अधिकारिणाम् आचरणं गुप्तचरैः सम्यक् निरीक्ष्य नृपतिः उत्तमचरित्रान् अधिकारिजनान् सम्मानयेत् विपरीताचरणयुक्तान् च दण्डयेत्। यश्च उत्कोचम् आदाय जीविकामुपार्जयति राजा तस्य सर्वं धनम् अपहृत्य देशात् निःसारयेत्।[3] देशस्य व्यवस्था तेन प्रकारेण विच्छिन्ना अस्ति यत् उत्कोचं विना कुत्रचिदपि लघु दीर्घं वा किमपि कार्यं न सम्पद्यते। सम्प्रति सर्वकारीयतन्त्रस्य सफलतायै इदम् आवश्यकमस्ति यत् उत्कोचवृत्तिं भ्रष्टाचारं च समापयितुं विधयः निर्मातव्याः। अद्य उत्कोचं, भ्रष्टाचारं निवारयितुं तं जनं निर्धनं कृत्वा देशात् निःसारणस्य दण्डं नैव दातुं शक्यते, परं निर्धनं कृत्वा सर्वकारीयसेवातः सःमुक्तः कर्तुं शक्यते। अद्य उक्तप्रकारेषु भ्रष्टाचारप्रकरणेषु निलम्बन-मात्रस्य विधानम् अस्ति, भ्रष्टश्च लोकसेवकः जनः निलम्बनकालं व्यतीत्य पश्चात् स्वकीयमधिकारपदं पुनः प्राप्नोति। एवंविधैः प्रकरणैः सर्वकारीयसेवारताः लोकसेवकाः अधिकारिणः कर्मचारिणः च दण्डभयरहिताः, स्वेच्छाचारिणः, धनलुब्धाः, निर्दयाः च उत्तरोत्तरं भवन्ति प्रजा च नित्यं भ्रष्टाचारदुर्व्यवस्थाग्निना अहोरात्रं त्राहि मां कुर्वन्ती दन्दह्यते। अतः वर्तमानयुगे याज्ञवल्क्यसम्मताः प्रशासनिक-भ्रष्टाचारवारकाणां कठोरनियमानां प्रावधानम् अत्यन्तम् आवश्यकम्। एवं कृते सति लोकोऽयं भयरहितः निरातंकः सुखी च भविष्यति।

वर्तमानयुगे पीडितजनेभ्यः न्यायालयमाध्यमेन न्यायप्राप्तेः गतिः शिथिला वर्तते। यथा पशूनां

आहारसम्बन्धिभ्रष्टाचारप्रकरणस्य मुख्याभियुक्तः बिहारराज्यस्य पूर्वमुख्यमन्त्री न्यायालयीय-व्यवस्थया दण्डनिर्धारणेन सप्तदशवर्षाणाम् अनन्तरं दण्डितः अभवत्। एवमेव भारतीयसंसदि आक्रमणस्य मुख्याभियुक्तः न्यायालयीयव्यवस्थया अनेकवर्षानन्तरं दण्डितः अभवत्। एवंविधानि भारतीयन्यायव्यवस्थायां अनेकोदाहरणानि सन्ति यत्र न्यायालयेन शीघ्रतया निर्णयः न कृतः। अनया न्यायालयीयदुर्व्यवस्थया अपराधिनां साहसः वर्धते। पीडिताः च हतोत्साहाः भवन्ति किन्तु याज्ञवल्क्यस्मृतिमनुसृत्य दण्डविधानस्य निर्णयः न्यायाधीशेन (राज्ञा) शीघ्रतया करणीयः। उदाहरणं यथा - विषशस्त्रादिभिः प्राणहरणस्य, चौर्यस्य, कठोरभाषणस्य, सदुग्धायाः धेनोः हत्यायाः, धननाशस्य, स्त्रीणां च विवादेषु तत्कालं निर्णयः करणीयः। यस्तु साक्ष्यं स्वीकृत्य पश्चात् किमपि न वदति राजा तादृशेन जनेन वृद्धिसहितं सम्पूर्णऋणधनं धनिने ऋणदात्रे वा दापयेत्। अनेन सहैव राजा तस्मात् दशमांशमपि गृह्णीयात् सर्वमेवविधं धनं नृपः षट्चत्वारिंशत्तमे दिवसे दापयेत्।[4]

याज्ञवल्क्यस्य इदं विधानं शीघ्रन्यायस्य प्रतिपादनं करोति। यत् खलु न्यायिकप्रक्रियायाः आद्या अनिवार्या च व्यवस्था स्यात् परन्तु वर्तमानकाले न्यायप्रक्रिया अत्यन्ता जटिला अभवत्। न्यायालयेषु एवंविधानां विवादानां निष्पादने दशतः विंशतिवर्षाणि यावत् कालः याप्यते। अतः अद्य महती आश्यकतेयमस्ति यत् अस्माकं न्यायप्रणाल्या याज्ञवल्क्यस्मृतिप्रतिपादितो विधिः, व्यवस्थाप्रक्रिया च अनुसरणीया। येन सर्वविधानां विवादानां निर्णये अल्पकालस्य बन्धनं सर्वत्र आवश्यकं करणीयम्। एवं कृते सति शीघ्रतया न्यायः प्राप्तुं शक्यते।

इतोऽतिरिक्तानि याज्ञवल्क्यस्मृतौ नैकानि विधानानि सन्ति यानि मनुष्येभ्यः अनुशासनस्य, मर्यादायाः, नैतिकतायाः च शिक्षां प्रयच्छन्ति। वस्तुतः इयं सम्पूर्णा स्मृतिरेव मानवस्य सर्वाङ्गीणं, सार्वकालिकं, सार्वजनीनं च विकासम् उद्दिश्य रचिता। यदि सर्वे जनाः स्मृतिनिरूपितान् नियमान् अनुसृत्य आचरेयुः तदा कुत्रचिदपि किञ्चिदपि काठिन्यं न संभविष्यति। सर्वत्र सुखस्य, शान्तेः सन्तोषस्य च वातावरणं सम्पत्स्यते। अतः स्पष्टं यत् याज्ञवल्क्यस्मृतिः सनातनसंस्कृतेः सनातनोपहारः। स्मृतिरियं पृथिव्यां मानवजन्मनः पश्चात् तस्य जीवनस्य प्रकृत्या सह समरूपतां स्थापयितुं मानवसमाजस्य महार्हः निधिः अस्ति।

**सन्दर्भग्रन्थसूची :-**


1. मनु-अत्रि-विष्णु-हारीत-याज्ञवल्क्य-आंगिरस-यम-आपस्तम्ब-संवर्त्त-कात्यायन-बृहस्पति-पराशर-व्यास-शंख-लिखित-दक्ष-गौतम-शातातप-वशिष्ठ-औशनस इत्यादिनां स्मृतिग्रन्थाः।
2. (क) श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
   सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्।
   -याज्ञवल्क्यस्मृतिः, आचाराध्यायः श्लोकः 7

   (ख) अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
   दानं दमो दया शान्तिः सर्वेषां धर्मसाधनम्।
   -याज्ञवल्क्यस्मृतिः, आचाराध्याय श्लोकः 122
3. ये राष्ट्रेऽधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम्।
   साधून्संमानयेद्राजा विपरीतांश्च घातयेत्।।
   -याज्ञवल्क्यस्मृतिः, आचाराध्यायः श्लोकः 338-391
4. साहसस्तेयपारूष्यगोभिशापात्यय स्त्रियाम्।
   विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः।।
   अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम्।
   राज्ञा स वै प्रदाप्यः स्यात् षट्चत्वारिंशते ऽहनि।।
   -याज्ञवल्क्यस्मृतिः, व्यवहाराध्यायः श्लो. 12, 76



**शोधछात्रा**

**संस्कृत-विभागः, राजस्थान विश्वविद्यालयः**

**जयपुरम्**

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### भारती-उद्धर्ता पुत्रः स्यात्

मातृरूपेण पुष्णासि त्वं शारदे,
भारतीयं समस्तं जनं वन्दिते।
कोऽपि तोकस्तवेष्टः समुत्पत्स्यते,
हा कथं भारती आहता भारते।। २६५ ।।

### वेदना

जारजास्सेवितुन्नार्हमाणा मया,
मातरं शास्त्रगीस्संब्रुवाणा श्रुता।
श्रूयते चौरसा एव रत्यावृता,
हा कथं भारते भारती आहता।। २६६ ।।

### द्रविणात्मानः मानुषाः

साम्प्रतं स्वाश्रितास्सन्ति हा मानुषाः,
स्यादियञ्चापि तैः प्रक्ष्यते पूर्णिका।
द्राविणैः पर्विकेन्दुप्रभेवाद्य सा,
हा कथं भारती भारते आहता।। २६७।।

### संस्कृतस्य षाणमासिकं पाठ्यवस्तु स्यात्

लाघवं ते स्वरूपं नु पौराणिकं,
रोचतेस्माधुना मित्र ! वायार्जवम्।
पाठ्यवस्तु प्रपाठ्यं हि षाण्मासिकम्,
आहता भारते भारती हा कथम्।। २६८।।

### कीदृशी संस्कृतपाठशाला

भाषणं संस्कृते सर्वथा स्यादिदं,
लेखनं शासनं यत्र संचिन्तनम्।
तादृशी शालिकाऽपाययन्ती नवा,
हा कथं भारते भारती आहता।। २६९ ।।

### अद्यतन-संस्कृताध्यापकदृष्टिहापनम्

भारतीज्ञैरमुं मूलतो हापयेत्,
संस्कृतं वातिकृच्छ्रं समाजे छविम्।
उच्यतेऽध्यापकैरल्पधीभिस्सदा,
हा कथं भारती भारती आहता।। २७० ।।

### रुचिकरविषयनिर्मापणम्

आयुषीवाद्य योगे श्रुतेः ज्योतिषि,
तादृशी तेऽत्र नीतौ कथायां रुचिः।
सांख्यिकेऽन्यत्र सूक्तौं गिरां वैषये,
हा कथम् आहता भारती भारते।। २७१ ।।

### संस्कृतविस्तारसमाधानम्

राजनीतेरभावं यदा वृत्तिकां,
संलभेरन् सुशिक्षां हि विद्यार्थिनः।
संसमावर्तिनः संस्कृते चार्हणाः,
हा कथं भारते भारती आहता।। २७२ ।।

## राजनीतिप्रवेशदोषः

शिक्षकव्रातमेषानुचक्रे निजं,
लांगुलं दोलयन् सर्वतस्तामहो।
पालितं श्वानमेषोऽपि विद्यानुगम्,
आहता भारते भारती हा कथम्।। २७३।।

## मम निवेदनम्

रोचते नारिकायै न नारी नरः,
कोऽपि मायामनुष्यो हरिस्सुन्दरः।
मायिकेव प्रभो भक्तिकायै युवा,
हा कथं भारते भारती आहता।। २७४।।

मातृमोहादिबन्धत्यजो भ्रातरो,
भारतीराज्यकञ्जावालीवायकाः।
धन्यधन्यार्हणाः केचनाप्तोत्तमा,
हा कथं भारते भारती आहता।। २७५।।

गद्यवल्लीसु सौदामिनी द्योतते,
विश्वकाव्याक्षिकाशो यदान्धायते।
पद्यपर्वेन्दुचन्द्रा च चम्पूप्रभा,
हा कथं भारते भारती आहता।। २७६।।

## अद्यतना भारती

चैलभूषासुमुद्रात्रपास्वैरिता।
मण्डिता स्वामिनं स्वं जहत्योऽजजा,
स्वावलम्बं भजन्त्योऽधुनेहत्यिका,
हा कथं भारते भारती आहता।। २७७।।

विश्वमञ्चे विमातौरसं प्राहिणोत्,
सोज्झयित्वार्हसाहित्यसूनुं दधौ,
धूलिधौतन्न चातस्तवेदं वपुः,
आहता भारते भारती हा कथम्।। २७८।।

ओ लते ! ते विशाले सुभालेऽलके,
बिन्दुमिन्दुञ्च हिन्दुप्रियं सिन्दुरम्।
शून्यमध्ये रचेयं नवं भारतम्।
आहता भारते भारती हा कथम्।। २७९।।

अद्यभूतांग्लिकातोतिशेते प्रियं,
रूपमेषा मनीषाजुषां दासिका।
तावकञ्चेव या सा न राज्ञी कृता?
हा कथं भारते भारती आहता।। २८०।।

## कश्चित्सामर्थ्यवान् पुरुषः आश्रीयताम्

संघसाम्राज्यराजाधिराजाधिपो,
धापयेत्ते च ब्रह्माण्डगोलं गले।
शालभाले गुणस्यूतमालामये,
आहता भारती हा कथं भारते।। २८१।।

मर्म कर्म प्रकृष्टं चिरत्नं सतां,
संस्कृतेः शर्म धर्मं सुभाषं मातम्।
राष्ट्रियं सत्यमीप्सामवन्नीहते,
भारती आहता भारते हा कथम्।। २८२।।

नैकशाखाप्रतानोल्लसद्वल्लरि!
गम्यतामद्य संघाध्रिपाश्वत्थकः।
वल्लकीः वादयन् राष्ट्रतत्त्वारिकाः,
हा कथं भारते भारती आहता।। २८३।।

**व्याख्याता ( संस्कृतम् )**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

# आचार्यबदरिप्रसादशास्त्रिणां दर्शनशास्त्रीयग्रन्थाः

❑ मधुबाला बजाज

1. विरोधपरिहारभाष्यव्याख्यानम्।
2. जीवलक्षणपरिष्कारः।
3. पञ्चपदार्थी परीक्षा।
4. प्रतिबिम्बवादप्रत्याख्यानम्।
5. श्री बादरायणभाष्यम्।
6. द्विजशब्दमीमांसा।
7. श्रीरामानन्ददर्शनदीपकः।

**विरोध परिहारभाष्य व्याख्यानम्-**

विरोधपरिहारभाष्यं दार्शनिकग्रन्थेष्वेको वर्तते। विरोधपरिहारभाष्यस्य लेखकाः श्रीवृन्दावनदेवाचार्याः वर्तन्ते। अत्र ग्रन्थस्य नाम्ना एव स्पष्टीभवति यद् विरोध-परिहार एवास्योद्दश्यं विद्यते। आचार्यबदरीप्रसादशास्त्रि-महोदयैः अस्मिन् विरोधपरिहारभाष्ये व्याख्यानं विहितम्। श्रीमतां वृन्दावनदेवाचार्यपादानां भावनानुकूलं व्याख्यानमत्र वर्तते अस्य। व्याख्यानस्यापरा विशेषता इयं वर्तते यद् विरोधपरिहारभाष्यस्य सरला सुगमा व्याख्या तथा च भाष्यतत्त्वानां बोधगम्यता वर्ततेऽत्र।

दार्शनिकग्रन्थाः प्रायशः कठिनाः प्रौढाः च भवन्ति। तत्र निरूपिताः प्रतिपादिताश्च सिद्धान्ताः दुर्बोधाः भवन्ति। अत एव भारतीयसंस्कृतवाङ्मये दर्शनसाहित्ये च तादृशोऽपि कालः आसीद् यस्मिन् टीकाग्रन्थेष्वपि टीकाः विलिख्यन्ते स्म ग्रन्थस्य वास्तविकज्ञानाय। अत एव विरोधपरिहारभाष्यव्याख्यानमपि तादृशः अत्यन्त-मुपयोगी ग्रन्थो वर्तते भाष्यज्ञानाय।

**जीवलक्षणपरिष्कारः**

भारतीयमनीषा प्रारम्भिककालादेव गवेषणपरायणा। किं नाम जगत्, कुतः उत्पद्यते इदं, कथं सृज्यते, केन पाल्यते को मृत्युः को जीवः, का माया, किं कर्म, को जीवात्मा, कः परमात्मा, सुख-दुःखे कथं भवत? इत्यादि- प्रश्नानां जिज्ञासानां च समाधानमन्वेषयन्ति सततम्। भारतीयदर्शनशास्त्राणि वेदान्तमीमांसान्याय-वैशेषिकादीनि इमान्येव तत्त्वानि प्रतिपादयन्ति।

'सर्वं खल्विदं ब्रह्म' 'ब्रह्म सत्यं जगन्मिथ्या' 'जीवो ब्रह्मैव नापरः' इत्यादिश्रुतिवाक्यानि वेदान्तादिषु शास्त्रेषु सुविस्तरं तथा व्याख्यातानि सन्ति। तैः सिद्धं स्पष्टतया यत् परमानन्दस्वरूपात्, स्वप्रकाशपरमार्थसत्यात् भगवतः परमेश्वरात्, दुःखात्मकं जडात्मकं मिथ्याऽपि व्यावहारिक-सत्यं जगदुत्पद्यते। वेदान्त-सिद्धान्तानुसारं तु ''आनन्दादेव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्ति, अभिसंविशन्ति'', इत्युपनिषदनुसारं परमानन्दघने परमेश्वरे भवत्येव सकलप्रपञ्चस्योत्पत्तिः स्थितिः प्रलयः प्रतीतिश्च भवति।

वेदोपनिषद् वेदान्तादिषु जीवस्य रूपं विविध-प्रकारेण निरूपितमस्ति। सरलशब्देषु भक्तशिरोमणिना गोस्वामिपादेन तुलसीदासेन रामचरितमानसे लक्षितो जीवः -

**''ईश्वर अंश जीव अविनाशी।**
**चेतन अमल सहज सुख राशि।।''**

अर्थात् जीव ईश्वरस्यांशोऽस्ति, अयं जीवः चेतनः अमलः निर्विकारः सुखराशिसदैवानन्दरूपः 'जीवो ब्रह्मैव नापरः' इति श्रुतिवाक्यमनुसरता गोस्वामिपादेनापि इदमेवोक्तम्। परमात्मतत्त्वरूपो ब्रह्म एव मायया सहावतीर्यते तदेवेश्वरः। जीवश्चेश्वरस्यांशो भवति। तदभिन्नो भवति। चैतन्यरूपोऽस्ति- ईश्वरोऽपि सच्चिदानन्दरूपः प्रोक्तोऽस्ति। अदस्मादेव जीवेऽपि तद्गुणा अवतिष्ठन्ते।

प्राय: सर्वेष्वेव वैष्णवदर्शनेषु जीव: अणुस्वरूप: प्रोक्त:। केचनात्र विवदन्ते परञ्च ''अणुहि जीवं प्रतिदेह-भिन्नं ज्ञातित्वन्तम्'' इति लक्षणं निर्दुष्टमिति आचार्य-बदरिप्रसादशास्त्रिमहोदयानां मतमस्ति। किमयं जीव:, ब्रह्मणो भिन्न:, उताभिन्न:, आहोस्वित् ब्रह्मणोऽशोऽतो भिन्नाभिन्न: इति प्रश्न: समुदेति। प्रौढचिन्तनचन्द्रिकायां निम्बार्कदर्शनस्य विशिष्टाद्वैतत्वं च संसाधयन्तोऽऽ-चार्यबदरिप्रसादशास्त्रिणो जीवलक्षणविषये विस्तृतया निरूपयन्ति।तत्रोक्तं-

''राज्ञ: सकाशात् पुरूष इव परमात्मन: सकाशाज्जीवो भिन्नोऽस्तु, अभेदवाक्यानां गौणत्वादज्ञ-सर्वज्ञयोरभेदासंभवाच्च। अथवाऽभिन्न एवास्तु, भेदश्रुतीनां गौणत्वात्। भेदाभेदयोरन्योन्यविरुद्धत्वादभेद-श्रुतीनां भेदश्रुतीनां वाऽवश्यं गौणत्वमङ्गी कर्त्तव्यम् इति प्राप्तेऽभिधीयते।''

अत्र जीवस्य तिस्र: स्थितय: परिकल्पिता: सन्ति, अयं जीव: परमात्मनो भिन्न:, अथवा तदंश इति। परञ्चाज्ञ-सर्वज्ञयोरभेदो न संभवति। पुनश्च भेदाभेद-योरन्योन्य-विरुद्धत्वादभेदश्रुतीनां भेदश्रुतीनां वाऽवश्यं गौणत्वं स्वीकर्त्तव्यम्। अग्रे ब्रुवन्ति आचार्यपादा:- ''नाऽयं जीव: श्रीपुरूषोत्तमादत्यन्तभिन्न:, नाऽप्यत्यन्ताभिन्न:, किन्तु परमात्मनोऽश:-'' ''अंशोह्येष: परस्येति श्रुते:।'' अंशो हि शक्तिरूपो ग्राह्य: ''एष: परस्य शक्ति: जीवोऽल्पशक्तिपरस्वतन्त्र: इतिश्रुते:।'' खण्डरूपो-धनादिवदंशो नेह गृह्यते जीवस्य ब्रह्मखण्डत्वे निष्कलमित्यादि वाक्यविरोधाद् घनवदंशत्वे केवलं भेदापत्ते: ''तत्त्वमसी'' त्यादिवाक्यव्याकोपप्रसङ्गाच्च। अंशित्वावाच्छिन्नात् परमपुरूषस्वरूपात् सार्वज्ञ्यादि-गुणगणनिधेरंशत्वावा-च्छिन्नेन बन्धमोक्षार्हेण स्वरूपेण भिन्नोऽप्यंश्यधीन-स्थितिप्रवृत्त्यादिमत्वात्तदभिन्न:[2]।'' अस्यायमाशयो जीवात्मनो: स्वाभाविकौ भेदाभेदौ भवत:। जीव-परमात्मनो: भेदाभेदौ स्पष्टतया प्रतिपादयन्ति महोदया:- ''उभयविधवाक्यानां तुल्यबलत्वात् जीवपरमात्मनो: स्वाभाविकौ भेदाभेदौ भवत: इत्यर्थ:। य आत्मानमन्तरो यमयति, अन्त: प्रविष्ट: शास्ता जनानाम् आत्मा हि परमस्वतन्त्रोऽधिगुण: जीवोऽल्पशक्तिर-स्वतन्त्रोऽवर: ज्ञाज्ञौ द्वावजावीशानीशौ इत्यादिभेदव्यपदेश:।

श्रुतिवाक्यकदम्बपुरस्सरै: षट्प्रमाणै: जीवस्य भेदाभेदत्वं प्रतिष्ठापितम्। अपरत्राचार्यचरणा: विशदी-कुर्वन्ति- ''एवं चेतनस्यापि (जीवस्य) ब्रह्मणा सह भेदाभेदौ स्वाभाविकौ शब्दन्यायसिद्धौ तत्र प्रकाशाश्रयवत् तेजस्त्वादिति हेतुभूतदृष्टान्ताभ्यां स्वसिद्धान्तं स्वाभावि-कभेदाभेदाभिधं साधयामास सम्प्रदायाचार्य:'' प्रकाशाश्रयवद् इत्यस्याभिप्रायं स्फोरयन्ति- ''यथा सूर्यमणि-दीपादि-प्रकाशस्तत्प्रभारूपस्वाश्रयात् सूर्यादेर्भिन्नतया प्रत्यक्षेणोपलभ्यते स्वाभाविक-भेदवत्त्वात्। सूर्यदीपादेर्दृष्ट्यगोचरत्वेऽपि सूर्य प्रमेयं दीपप्रकाशोऽयमिति।'' जीवस्य कर्तृत्वं ब्रह्माधीनमुक्त-मस्ति।यथोक्तं चन्द्रिकायाम्-

''एतावता भोक्ता भोग्यं प्रेरिता चेति तत्त्वत्रयस्य ब्रह्मत्वं तदपि चिदचितो: भोक्तृभोग्ययो: प्रेरितृ परमात्माऽऽयत्त स्थितिप्रवृत्तिकत्वात् चिदचितो-र्भिन्नस्वरूपयोरपि न वै वाचो न चक्षूंषि'' ''इत्यादि-छान्दोग्ये प्राणेन्द्रिय संवादे दृष्ट श्रुत्या चिदचिद्भिन्नाभिन्नं प्रेरितृ ब्रह्मवेदान्तदर्शनस्य विषय:।[3]'' इत्यादिभि: भोक्ता भोग्यं प्रेरितृ त्रयाणां तत्त्वानां ब्रह्मत्वं स्वीकृतम्। ऋग्वेदे जीवपरमात्मनो: भेदाभेदौ सुन्दररीत्या प्रकटितौ-

**''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति[4]।''**

---

1 प्रौ.चि.च.पृ.सं. 101, 2. प्रौ.चि.च.पृ.सं. 101

3. प्रौ.चि.च.पृ.सं. 101

4. ऋग्वेदे 1/164/20

समस्तदार्शनिकमतविरोधपरिहारपूर्वकं जीवस्य ब्रह्मणा सह भेदाभेदौ आचार्यचरणैः संसाधितौ। तन्मते जीवब्रह्मणोः भेदाभेदौ तादात्म्येन स्वाभाविकौ सिध्यतः। तादात्म्यञ्च वृति नियामक सम्बन्धः उच्यते।

अनेन प्रकारेणाचार्यप्रवरैः पण्डितश्रीबदरिप्रसाद-शास्त्रिपादैः महता प्रयासेन जीवस्य लक्षणं परिष्कृतम्। विविधदार्शनिकवादमुख्यान् तन्मध्ये आभासितविरोध-वाक्यानि च निराकृत्य विरोधपरिहारं संस्थाप्य परिष्कृतं जीवलक्षणं प्रतिष्ठापितम्। अयं जीवः अणुस्वरूपः। अस्मिन् विषये न शंकनीयम्। यद्यपि वैष्णवैः जीवोऽयं अणुस्वरूप एवोक्तः किन्तु तत्र केचन विरोधाः अपि दृश्यन्ते। अत एव विरोधपरिहारपूर्वकं जीवो लक्षितोऽस्ति। इदानीमाचार्याणां पञ्च पदार्थी परीक्षेति प्रबन्धकल्पस्य ग्रन्थस्य समीक्षा विधीयते।

**पञ्च पदार्थी परीक्षा-**

पञ्चानां पदार्थानां लक्षणादिभिः परीक्षा यत्र तत्पञ्च-पदार्थी परीक्षा इति नाम ज्ञेयम्। अर्थात् अत्र पञ्च पदार्थानां विषयो निरूपितोऽस्ति। के पञ्च पदार्था इति विषयेऽत्र विस्तारपूर्वकं प्रतिपादनं प्राप्यते। भारतीय-दर्शनसाहित्ये जीवाजीवभेदेन चेतना-चेतनभेदेन यो द्विधा पदार्थः स्वीकृतोऽस्ति। प्रत्यक्षोऽयं चेतना-चेतनात्मकजगत्प्रपञ्चस्तत्रापि चेतनेऽस्मिन् अनन्त-प्राणिपुञ्जे श्रेष्ठोऽयं मानवसर्गः तस्य ज्ञानमयत्वात्। यथार्थप्रमापर्यायं ज्ञानमिदं विचारवैचि येण ग्रहण-कौशलानुकूलं भिद्यते।

जीवाजीवौ चेतनाचेतनौ वा द्वौ पदार्थौ, किन्तु केचनान्ये ईश्वरवादिनो दार्शनिकप्रवराः ईश्वर इति तृतीयः पदार्थः इति मन्यन्ते। एवञ्च केषाञ्चिन्मते द्वौ केषांञ्चिच्च त्रयः पदार्थाः। पञ्चपदार्थी परीक्षा नामके ग्रन्थे आचार्य बदरिप्रसादशास्त्रिभिः चेतनपदार्थस्य ईश्वरजीवौ भेदौ जडपदार्थस्य च माया काला चेतना इति त्रयो भेदाः कृताः।

विश्वस्य सम्पूर्णसाहित्ये दर्शने धार्मिकग्रन्थेषु च विचारवरिष्ठाः विद्वांसो दार्शनिकाः नाना ग्रन्थनिर्मातारश्च पदार्थतत्वनिश्चये विवदमाना दृश्यन्ते परञ्च परम्परेयं शास्त्रज्ञानवाहिनीं मन्दाकिनीं स्वच्छीकरोति। विचारान्तराणां समावेशात् स्वीकरणात् शास्त्रसिद्धांताः परिष्कारमुपयान्ति। वादे-वादे जायते तत्त्वचिन्ता। अत एवानादिकालतः भारतीयमनीषा निरन्तरं चिन्तन परिपाटीं धारणे पटीयसी विलोक्यते। अत्र पञ्च पदार्थानां विषये किञ्चिदुच्यते।

भारतीयदर्शनेषु प्रमाणानां संख्याविषये[5] पर्याप्तमत-भेदस्तथैव प्रमासंख्यायामपि मतभेदः सर्वेषु दर्शनेषु दृश्यते। वेदान्तादि दर्शनेषु पञ्चपदार्थानां विवेचनं प्राप्यते। प्रपत्तिदर्शनेऽपि पञ्च पदार्थाः स्वीकृताः सन्ति। तत्रोक्तं प्रमेयपदार्थत्रयं पञ्चकं वा। परमात्मा चेतनाचेतनप्रकृति-द्वयं तच्च परमात्मशक्तिरूपं प्रपत्तिः मुक्तिश्चेति पञ्च पदार्थाः।

तत्रादौ परमात्मपदार्थः अस्य जडचेतनात्मक-प्रपञ्चस्य जगतः कारणरूपोऽस्ति। अस्मिन् विषये आचार्यविश्वनाथमिश्राः निगदन्ति स्वीये 'जगन्मीमांसा' शीर्षकवहे निबन्धे- ''विविधवैचित्र्योपेतमिदं जगत्। पश्यतु मनाक् मध्ये नभो दृश्यमानोऽयं सूर्यः प्रखरतेजो राशिर्महतां महीयाननवरतं प्रकाशमानो भासयति जगत्स्थलीम्। परितस्तं परिवारयन्ति संख्यातीता नक्षत्र-

5. प्रत्यक्षमेव चार्वाकाः काणादसुगतौ पुनः।
अनुमानञ्च तच्चाथ सांख्याः शब्दे च ते अपि।।
न्यायैक दैशिनोऽप्येवमुपमानं च केचन।
अर्थापत्या सहैतानि चत्वार्याह प्रभाकरः।।
अभाव षष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिहेययुक्तानि तानि पौराणिका जगुः।।
प्रमयसिद्धिः प्रमाणाद् हि इति सांख्याः प्रमाणत्वं नाम प्रभाकरणत्वं, प्रमाणज्ञानेनैव प्रमातृप्रमेयादि पदार्थ-ज्ञानं भवतीति नैयायिकाः।

राशयः। एषु कोट्यधिकसंख्यकेषु ग्रहेषूपग्रहेषु च प्रत्येकमाकर्षणं विकर्षणञ्चेतादृशं नियमबद्धं यन्न भवति अतिक्रमो मर्यादायाः काचिदपि कथञ्चिदपि। स्वकीय-कक्षायां सततं भ्रमन्तो ग्रहाः न चोपयान्ति संघट्टमणुमात्रमपि। अप्यहो नियमबद्धता। अपरत्रमिदं सूर्यरश्मिभिः संताप्यमानं जगदिदमाप्लावयति शीतरश्मिर्निजसुधास्यन्दिभिः करनिकरैः। कदाचित् प्रवरति सकलमनुजतनुमनःसमीरणः शीतलो मन्दः सुगन्धी मातरिश्वा चेद सावेवम्।''

कदाचिद् दहनज्वाला मालायमानः प्रदहन्निव निखिलभुवनमण्डलं सर्वेषामुद्वेजकः सम्पद्यते। क्वचिद् गर्जन्ति अकूपाराः, अपरत्र प्रवहन्ति सरितः, इतरत्र राजन्ते वनानि, एकत्र मरुस्थलं, चेदपरत्र शस्य श्यामला मेदिनी। विविधरंगरञ्जितानां शुकपिकमयूरकारण्डवानामपूर्वां शोभां दृष्ट्वा कस्य मनो मुग्धं न भवति । यावदेव दृश्यते सर्वत्र नवीनतैव प्रतिपदं दृष्टिपथमवतरति। फलतः स्पष्टमेव शक्यते वक्तुं विचित्रमिदं जगदिति[6]।

अस्य विविध विचित्रवैशिष्ट्योपेतस्य जगतो निर्माता परमात्माऽस्तीति वेदान्तिनो वदन्ति। यद्यपि वेदान्त-दर्शनस्य विभिन्नदृष्ट्या नैकानि भाष्याणि निरमायिषत विभिन्नभाष्यकारैः। तेषु केषुचित् सविशेष-ब्रह्मवादिनोऽभूवन् यथा विशिष्टाद्वैतवादिनो द्वैतवादिनो द्वैताद्वैतवादिनः शुद्धाद्वैतवादिनश्चेति। शङ्कराचार्याश्च निर्विशेषब्रह्मवादापरपर्यायद्वैतवादं व्यवस्थापत्। एतद् वादानुसारं ब्रह्मैवैकं परमार्थसद्वस्तु। जगच्च व्यवहारिक-सत्तायुतमेव सकल व्यवहाराय कल्पते। जीवोऽपि ब्रह्मैव नापरः। अनुभूयमानो भेदो न वास्तविकः- सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चन इति वादस्यास्याशयो यथाहि श्रुति वाक्यानि-

**''इन्द्रं मित्रं वरूणमग्निमाहुरथो दिव्यः स सुपर्णो गरूत्मान्।**
**एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।।''**

अस्मिन् मन्त्रे अद्वैतं समर्थितं भवति। एवमेव भगवतः श्री कृष्णस्योक्तिरपि समुल्लेख्या वर्तते-

**''यद् यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव च।**
**तत्तदेवावगच्छ त्वं मम तेंजोऽश संभवम्।।''**

पञ्चपदार्थी परीक्षाकाराः आचार्यबदरिप्रसादचरणाः पञ्चपदार्थेष्वाद्यं परमात्मानं निरूपयितुमुपक्रमन्ते- ''तत्रायं चेतनाचेतनाजगत्प्रपञ्चः तस्याभिन्ननिमित्तो-पादान कारणरूपः परमात्मपदार्थः, स च सनातनः सच्चिदानन्दघनः[7] उपासकजीवेच्छानुकूलोऽप्राकृत-दिव्यविग्रहः सौशील्यसौकुमार्यसौन्दर्यमाधुर्यमार्दवा-कारणकरुणावरुणार्णवाद्यनन्तदिव्यगुणकः, अस्पष्ट-मायिकदोषलेशः श्रीरामश्रीकृष्णादिरूपः एव। तदायत्त-स्थितिप्रवृत्तिकः अनादिरनन्तश्च ज्ञानस्वरूपः अनादि-मायायुक्तः बन्ध मोक्षार्हो जीववर्गः। तत्र कतिपये नित्य-मुक्ताः इत्येवं संक्षेपतश्चेतनपदार्थः श्रुतिसिद्धः उक्तः[8]।''

अर्थात् अस्य चेतनाचेतनात्मकस्य जगत्प्रपञ्चस्य भिन्ननिमित्तोपादानकारणरूपः परमात्मपदार्थः। स एवास्य जगतो निमित्तकारणं स एव चोपादानकारणम्[9]। कारणं समवायि-असमवायि-निमित्तभेदात् त्रिविधम्। तत्र समवायिकारणं यत् समवेतं कार्यमुत्पद्यते तत्समवायि कारणं यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः। असमवायिकारणं च कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणं यथा तन्तुसंयोगः पटस्य। तदुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमादिकं पटस्य। परमात्मा जगतो निमित्तोपादान-कारणम्। रामानुजसम्प्रदाये ईश्वरः पारमार्थिक-

---

6. प्रौ.नि.सौ.पृ.सं. 201
7. सच्चिदानन्दरूपाय विश्वोत्पत्यादिहेतवे।
   तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः।।
8. प्रौ.चि.च.पृ.सं. 106
9. कार्यनियतपूर्ववर्तिकारणम्-तर्कसंग्रह-सू. 40

सत्ताऽस्ति। अचेतनप्रकृतिः चित् चेतनात्मवेति ईश्वरांशौ। ईश्वरः सर्वशक्तिमान् सर्वज्ञश्चास्ति। ईश्वरे प्रकृतिः (माया) सदैवावतिष्ठते। ईश्वरीयमायातत्त्वादयं संसारः समुपत्पद्यते। अस्तु प्रकृतमनुसरामः।

अयं परमात्मा सनातनः सदाभवसनातनः इत्यमर वचनात् सनातनः सदाभवः सच्चिादानन्दघनः सत् चित् आनन्दघनः, उपासकजीवेच्छानुकूलोऽप्राकृतदिव्य-विग्रहः सम्पूर्णसद्गुणसम्पन्नः श्रीरामश्री कृष्णरूपोऽस्ति।

''अचेतनपदार्थस्तु मायाप्रधानादिशब्दवाच्यः प्राकृताऽप्राकृतभेदेन द्विविधः। तत्राप्राकृतो गो-निकुञ्ज-साकेतवैकुण्ठलोकाख्य एक एव प्रपन्नभावनानुकूलो विभिन्नोऽनुभूयते। सत्त्वरजस्तमो गुणमयः प्राकृतो-ऽचेतनपदार्थः[10]।'' अर्थात् अचेतनपदार्थः प्राकृत-अप्राकृतभेदेन द्विविधः। तयोः अप्राकृतः प्रपन्न-भावनानुकूलो श्रीरामकृष्णादिरूपः विभिन्नोऽनुभूयते। त्रिगुणः सत्त्वरजतमोगुणमयः प्रकृतस्तु अचेतनपदार्थः। इत्येवं पदार्थत्रयं परमात्माचेतनाचेतनं परमात्मा-प्राकृतोऽप्राकृतं वैकं ब्रह्मयथोक्तं श्वेताश्वतरश्रुतौ- ''भोक्ताभोग्यं प्रेरितारञ्च मत्त्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्[11]।'' अस्याः भगवत्याः श्रुतेः भावः भोक्ता जीवः, भोग्यं प्रकृतिः प्रेरितृ पदार्थः परमात्मा चेति। अत्रापि त्रयः पदार्थाः। त्रितयं चैतत् सर्वं तादात्म्येन त्रिविधं ब्रह्मोच्यते।

अस्मिन् विषये आचार्यचरणाः श्री बदरिप्रसाद-शास्त्रिणोऽन्यत्रापरेऽस्मिन् निबन्धे लिखन्ति- ''अस्त्येवं श्री निम्बार्क दर्शने प्रागुक्तश्रुत्युक्तं त्रिविधं 'ब्रह्म' तत्र प्रेरितृ-ब्रह्मणा सह चिद्चितोरुभयोः स्वाभाविको भेदोऽभेद-श्चेत्येव वेदान्तदर्शनं सप्रमाणं व्याचक्षाण आचार्यः स्वदर्शनस्य स्वाभाविकभेदाभेदापरपर्याया-स्वाभाविक-द्वैताद्वैतसंज्ञा प्रख्यापयामास।'' यथाह स्वनिर्मितायां वेदान्तश्लोक्यां-

**''सर्वं हि विज्ञानमतो यथार्थकं**
**श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः।**
**ब्रह्मात्मकत्वादिति वेदविन्मतं**
**त्रिरूपतापि श्रुतिसूत्रसाधिता।।''**

प्रधानादिपदवाच्यस्याचेतनपदार्थस्य स्थूलसूक्ष्म-शरीरस्य प्रेरितृपरमात्मना ब्रह्मणा सह स्वाभाविकौ भेदाभेदौ सिद्ध्यतः। तत्र पंच पदार्थाः चिद् अचिद् ब्रह्म कृपाफलं (मोक्ष) भक्तिरसः (उपासना-जन्यानन्दः) इत्येव स्वीक्रियन्ते। इदं पदार्थपञ्चकं स्वकीयवेदान्त दशश्लोक्यामित्थमजीगणत् -

**''उपास्य रूपं तदुपासकस्य च**
**कृपाफलं भक्तिरसस्ततः परम्।**
**विरोधिनो रूपमथैतदाप्तैः**
**ज्ञेया इमेऽर्था अपि पञ्च साधुभिः[12]।''**

चिदचिद् ब्रह्मेति त्रय एव पदार्थाः मुख्याः सन्ति। कृपाफलभक्तिरसौ तु मुक्तमुमुक्षु जीवनिष्ठौ। किन्तु विषयतया तदीयसत्ताऽवगमात् पञ्चेति युक्तमेवोक्तम्। श्रीरामानन्दरामानुजयोर्विशिष्टाद्वैतेऽपि त्रय एव पदार्था उच्यन्ते। चेतनाचेतनात्मकजगत्प्रपञ्चे ब्रह्मकार्यरूपेऽ-खिलोऽपि जीववर्गः पुमर्थचतुष्टयं कामयमानोऽपि शाश्वतसुखाभिलाषुकः परञ्च स्वस्नानादिकर्मात्म-काऽविद्याविमोहितान्तःकारणत्वाद् आस्तिकनास्तिक-भेदेन द्विवधा विभक्तः यथाह भगवान् कृष्णः-

**''द्वौ भूतसर्गो लोकेऽस्मिन् दैव आसुर एव च[13]।''**

अर्थात् देवानामयं दैवः, असुराणामयमासुरः। दैवः

10. प्रौ.चि.च.पृ.सं. 106
11. श्वेता. 1-12 अत्र मन्त्रे अकारान्तं ब्रह्म-पदमौणादिकप्रत्ययसिद्धं नपुंसक लिंगकं वेदितव्यम्- इति तत्रैव पृ.सं. 106
12. वेदान्तदशश्लोकी श्लोक सं. 10
13. श्रीमद्भगवद्गीता 6-26

आस्तिकः, आसुरो नास्तिकः उच्यते। अस्ति परलोकः परमात्मा चेति मतिर्यस्य स आस्तिकः, नास्ति परमात्मा परलोकः चेतिमतिर्यस्य स नास्तिकः। द्विविधस्यास्य मानवसर्गस्य वैदिकत्वमपि वैदिक सभ्यताया श्रूयते-

**''कालःस्वभावो नियतिर्यदृच्छा भूतानि**
**योनिः पुरूष इति चिन्त्याः''**
**संयोग एषां न त्वात्मभावाद् आत्माप्यनीशः**
**सुखदुःख हेतोः[14]।**

इति षोढा जगत्कारणं महर्षिभिः चिन्तितम्। दर्शनान्तरेषु भिन्नत्वमुपलभ्यते यथाहि बौद्धाः-

**''मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगद्,**
**योगाचारमते हि सन्ति हि धियस्तासां विवर्तोऽखिलः।**
**अर्थोऽस्ति क्षणभङ्गुरस्त्वनुमतो बुद्ध्येति सौत्रान्तिकः**
**प्रत्यक्षं क्षणभङ्गुरञ्च सकलं वैभाषिको भाषते।।''**

अनेन प्रकारेणाचार्यश्रीबदरिप्रसादशास्त्रिणः पञ्चपदार्थीपरीक्षायां पदार्थत्रिकं पञ्चकं विस्तरेण विशदतया निरूपयन्ति प्रतिपादयन्ति च। परञ्चैतेषामाचार्याणां मतमपि पदार्थत्रिकं समर्थयति इति अवगन्तव्यम्।ग्रन्थे तैः स्पष्टमुक्तम्-

**''किञ्च तथाप्यत्र चिदचिद् ब्रह्मेति**
**त्रय एव पदार्थाः प्रमुखाः सन्ति।**
**कृपाफल भक्तिरसौ तु मुक्त मुमुक्षु-**
**जीवनिष्ठौ न तु बद्धजीवनिष्ठौ[15]।''**

ग्रन्थेऽस्मिन् विषयवस्तुप्रतिपादनेऽतीव गाम्भीर्यं विलोक्यते तथा च दार्शनिकविषयपरत्वेऽपि नात्र भाषायां पाण्डित्यप्रदर्शनायाडम्बरता यथाहि अद्यत्वे केषुचित् शास्त्रभ्रष्टेषु पल्लवग्राहिपण्डितेषु दरीदृश्यते।(क्रमशः...)

**शोधच्छात्रा**
**ज.रा.रा.सं.वि.वि, जयपुरम्**

14. श्वेता. 1/2
15. प्रौ.चि.च.पृ.सं. 92

## संस्कृतसमाचारः

31.05.2016 तः 06.06.2016 पर्यन्तं सेठ-श्रीसूरज-मलतापड़िया-आचार्यसंस्कृतमहाविद्यालयः, जसवन्तगढ़ इत्यनया संस्थया सप्तानां दिनानाम् आवासीयः सम्भाषणाभ्यासः काव्यव्याकरणलेखनवर्गश्च समायोजितः। अस्य वर्गस्य उद्घाटनसत्रे प्राचार्यः डॉ. हेमन्तकृष्णमिश्रः, श्री वी.के. नागरः, वैद्यः रमेशकुमारपारीकः, डॉ. परमेशकुमार शर्मा एवं श्रीमान् सौरभ दुबे च उपस्थिताः आसन्। अस्मिन् आवासीयवर्गे पंचत्रिंशत् छात्राः भागं गृहीतवन्तः, ये वारत्रयं वारचतुष्टयं च संभाषणशिविरं भाषाबोधनवर्गं च कृतवन्तः सन्ति। प्राचार्येण एतेषां व्याकरणस्य विशेषाभ्यासाय लेखनाभ्यासाय च हिमाचलप्रदेशस्य संस्कृतभारत्याः प्रान्तशिक्षणप्रमुखः डॉ. परमेशशर्मा समाहूतः। अस्मिन् अवसरे संस्कृतिशोधसन्देशपत्रिकायाः लोकार्पणमपि



जातम्। यस्याः सम्पादकाः डॉ. विष्णुकान्तपाण्डेयः (राष्ट्रिय संस्कृतसंस्थानम् जयपुरपरिसरः), डॉ. हेमन्तकृष्णमिश्रः (प्राचार्यः, सेठश्रीसूरजमलतापड़िया-आचार्यसंस्कृत-महाविद्यालयः, जसवन्तगढ़), डॉ. परमेशशर्मा (राष्ट्रिय-संस्कृतसंस्थानं, गरलीपरिसरः), डॉ. पंकजःपुरोहितः (राष्ट्रिय-संस्कृतसंस्थानं, जयपुरपरिसरः) च सन्ति। कार्यक्रमः अत्यन्तं यशस्विरूपेण प्रावर्तत।

नारी-स्तम्भः

# गार्गी गुरूणां गुरुः

❑ डॉ. राजेश्वरी भट्टः

महत्तपसा बोधगम्येषु वेदान्त-व्याकरण-दर्शनादिषु गहनविषयेषु निष्णाता, प्रकाण्ड-पाण्डित्येन नैष्ठिकचरित्रेण च विद्वद्वृन्दे विख्याता, ब्रह्मवादिनी गार्गी युगयुगेभ्यो लोके स्मर्यते। प्रज्ञापारंगता 'वाचक्नवीगार्गी' गर्गगोत्रोद्भवस्य महर्षेर्वचक्नोः पुत्री आसीत्। गोत्रेणैव सा गार्गी नाम्ना प्रथिता जाता। बृहदारण्यकोपनिषदि तृतीयेऽध्याये 'जनकाश्वमेधप्रकरणे' गार्गी-याज्ञवल्क्ययोर्मध्ये प्रवर्तमाने ब्रह्मविषयके शास्त्रार्थे अधिगतपरमार्थाया धीमत्या गार्ग्याश्चमत्कृतिजनकं विशिष्टं वैदुष्यं वर्णनीयं वर्तते। बृहदारण्यकोपनिषदः ज्ञायते यत् कदाचित् परमतत्त्वजिज्ञासुना मिथिलाधिपेन जनकेन कृतार्थमात्मानं कर्त्तुं श्रेष्ठ-ब्रह्मविदः प्राप्तये बहुदक्षिणानामको यज्ञोऽनुष्ठितः। प्रज्ञापूजके पावनेऽस्मिन् पर्वणि मिथिलाधिपतिना ब्रह्मविषयक-शास्त्रार्थे विजेतुः ब्रह्मिष्ठस्य कृते सुवर्णमण्डित-शृङ्गधारिणीनां सहस्त्रगवां दानं घोषितम्। जनकेनाऽनुष्ठितेऽस्मिन् यज्ञे शास्त्रार्थस्य कृते दिग्दिगन्तरेभ्यो विशेषेण कुरुपाञ्चालप्रदेशेभ्यो ब्रह्मवेत्तारः समवेता जाताः। वाचक्नवी गार्गी अपि पण्डितप्रतिनिधिरूपेण तत्रोपस्थिताऽऽसीत् ततो महाराजेन जनकेन कथितं 'हे ब्राह्मणाः! यूयं भगवन्तः परन्तु वः यः ब्रह्मिष्ठः स एताः गा उदजताम्।'

–( बृहदारण्यकउपनिषद्, तृतीयाध्यायः )

जनकस्य वचांसि श्रुत्वाऽपि ब्रह्मवित्सु कोऽपि गाः न अनयत्। सहसा शास्त्रार्थस्थले उपस्थितस्य महषेर्याज्ञवल्क्यस्य शिष्यस्तस्यादेशेन गाः नीतवान्। एवं गते विद्वत्सभायां समुपस्थिताः सर्वेऽपि ब्रह्मिष्ठाः कुपिता जाताः। ततो यज्ञे होतृरुपेण सम्मानितोऽश्वलः ऋषिः याज्ञवल्क्यं पप्रच्छ ''हे याज्ञवल्क्य नु खलु त्वं नः ब्रह्मिष्ठः असि'' याज्ञवल्क्य उवाच ''वयं ब्रह्मिष्ठाय नमः कुर्मः वयम् एव गोकामाः स्मः।''

–( बृहदारण्यक उपनिषद 3 अध्यायः )

तदनन्तरम् अश्वलो गोदान विषये जनकस्य संकल्पं स्मारयित्वा याज्ञवल्क्यं ब्रह्मविषयक-दार्शनिकविषयानाधारीकृत्य प्रश्नानपृच्छत्। क्रमेण विद्वत्सभायां समुपस्थितैर्म-हर्षिजरत्कारु आर्तभाग उषस्त कहोलादिभिरनकैः ब्रह्मविद्भिः याज्ञवल्क्येन सह वाग्वैभवं प्रदर्शितम्। किन्तु याज्ञवल्क्यस्य उत्तरेण सर्वेऽपि धीमन्तः समाराधिता जाताः। अनन्तरं विद्वन्मल्लिका वाचक्नवी गार्गी अपि आत्मानं वारयितुं शक्ता न जाता। शास्त्रार्थस्थले समागत्य गार्गी याज्ञवल्क्यं पप्रच्छ ''याज्ञवल्क्य ! यदिदं सर्वम् अप्सु ओतं प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति'' याज्ञवल्क्येन कथितं ''गार्गि! वायौ'' समीचीनमुत्तरं प्राप्यापि गार्गी विरता न जाता। इममेव प्रश्नं सा वायु अन्तरिक्ष, गन्धर्वलोक, चन्द्रलोक, नक्षत्रलोक-देवलोक, इन्द्रलोक, प्रजापतिलोकानां किमधिकं ब्रहलोक-विषयेऽपि पृष्टवती। गार्ग्या समुत्थापितानां प्रश्नानाम् अविरतानुबन्धनेन विरज्य याज्ञवल्क्येन कथितं ''गार्गि माति प्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि।'' याज्ञवल्क्यस्य वचनानि श्रुत्वा वाचक्नवी गार्गी

**विरराम्। तदनन्तरं पारेब्रह्मणि याता नैका विद्वांसो याज्ञवल्क्येन सह शास्त्रार्थे प्रवृत्ताः प्राजिताश्च जाताः। ब्रह्मिष्ठानां सम्मत्या गार्गी पुनः याज्ञवल्क्यं प्रश्नद्वयं पृष्टवती। द्वयोः प्रश्नयोः सन्तोष- जनकमुत्तरं प्राप्य गार्गी ब्राह्मणानब्रवीत्। ''भगवन्तः ब्राह्मणाः तत् एव मन्येध्वम् यत् अस्मात् नमस्कारेण मुच्येध्वं वै युष्माकं कश्चित् इमं ब्राह्मणोद्यं जातु न जेता'' इति कथयित्वा गार्गी विरराम। गार्गीयाज्ञवल्क्ययो-र्मध्ये प्रवृत्ते शास्त्रार्थे विदुष्यां गार्ग्यां प्रज्ञायाः चूडान्तनिदर्शनं प्राप्यते। गार्ग्या निर्णयेन शास्त्रार्थे ब्रह्मवित्सु याज्ञवल्क्य एव श्रेष्ठ आसीत्। मिथिलापतिना श्रेष्ठब्रह्मविदः कृते संकल्पिताः सुवर्णमण्डितशृङ्गधारिण्यः सहस्रगावः याज्ञ-वल्क्याय प्रदत्ताः। विदुषी गार्गी यद्यपि पञ्चतत्त्वात्मकेन स्थूलदेहेन अत्र नास्ति किन्तु यशः-शरीरेण सा अद्यापि नारीणां कृते प्रेरणा स्त्रोतोऽस्ति। राजस्थानसर्वकारेण राज्ये प्रतिभाशालिनां छात्राणां कृते गार्गी पुरस्कारस्य योजनां स्वीकृत्य विदुष्या गार्ग्या आत्मनश्च गौरवः वर्धितोऽस्ति।**

## हिन्दी-अनुवाद

कठिन परिश्रम से बोधगम्य वेद-वेदान्त-व्याकरण दर्शन आदि विषयो में निष्णात, प्रकाण्डपाण्डित्य एवं नैष्ठिक चरित्र के कारण विद्वद्वृन्द में विख्यात ब्रह्मवादिनी 'वाचक्नवी गार्गी' युगयुगों से लोक में स्मरणीय है। प्रज्ञा पारंगता गार्गी गर्गगोत्र में उत्पन्न महर्षि 'वचक्नु' की पुत्री थी। गर्ग गोत्र में उत्पन्न होने के कारण वे गार्गी नाम से प्रसिद्ध हुई। वृहदारण्यक उपनिषद् के तृतीय अध्याय में जनकाश्वमेधप्रकरण में गार्गी एवं याज्ञवल्क्य के बीच होने वाले ब्रह्मविषयक शास्त्रार्थ में परमतत्त्वज्ञानमेधाविनी गार्गी का चमत्कृतिजनक विशिष्ट वैदुष्य दर्शनीय है। वृहदारण्यक उपनिषद् से ज्ञात होता है कि कदाचित् परमतत्त्वजिज्ञासु मिथिलानरेश जनक ने अपने को कृतार्थ करने के लिए बहुदक्षिणा नामक यज्ञ का अनुष्ठान किया। प्रज्ञापूजक इस पावन अवसर पर जनक ने ब्रह्मविषयक शास्त्रार्थ में विजयी होने वाले ब्रह्मिष्ठ को स्वर्ण से मढ़े हुए सींगोवाली एक हजार गायें दान करने का संकल्प किया। जनकद्वारा अनुष्ठित यज्ञ में दिग्दिगन्तर से विशेषरूप से कुरुपाञ्चाल प्रदेश के ब्रह्म-वेत्ता एकत्रित हुए। पण्डित प्रतिनिधि के रूप में विदुषी गार्गी भी वहाँ उपस्थित थीं। इस अवसर पर जनक ने कहा आप सभी पूज्य हैं परन्तु आप में जो सबसे अधिक ब्रह्मनिष्ठ हो वह इन गायों को ले जाए। जनक के वचन सुनकर भी कोई विद्वान् गायों को नहीं ले गया। क्षणभर में शास्त्रार्थस्थल पर उपस्थित महर्षि याज्ञवल्क्य का शिष्य उन गायों को ले गया। इस घटना से समस्त ब्रह्मवेत्ता कुपित हो गए , और यज्ञ में होता रूप से सम्मानित अश्वल ऋषि ने याज्ञवल्क्य से प्रश्न किया हे याज्ञवल्क्य क्या तुम निश्चयरूप से हम लोगों में सबसे अधिक ब्रह्मिष्ठ हो? याज्ञवल्क्य ने उत्तर दिया मैं ब्रह्मवेत्ताओं को नमस्कार करता हूँ। मैं केवल गौओं की कामना वाला हूँ। यह सुनकर यज्ञ में होता रूप से सम्मानित अश्वल ऋषि ने गोदान के विषय में राजा जनक द्वारा घोषित संकल्प का स्मरण दिलाकर याज्ञवल्क्य से दार्शनिक विषयों पर प्रश्न किए। उसके पश्चात् यज्ञस्थल पर उपस्थित महर्षि जरत्कारु-आर्तभाग, उषस्तु कहोल आदि ब्रह्मविदों ने याज्ञवल्क्य ऋषि के साथ शास्त्रार्थ में अपना अपना वाग्वैभव प्रदर्शित किया। किन्तु याज्ञवल्क्य के उत्तरों से सभी पण्डित प्रसन्न हुए। इस पण्डितचर्चा में प्रकाण्ड

पण्डिता वाचक्नवी गार्गी भी अपने को रोक न सकी। विदुषी गार्गी ने याज्ञवल्क्य से प्रश्न किया। हे याज्ञवल्क्य! यह सब जो दृश्यमान वस्तु जल में ओतप्रोत है तो जल किसमें ओतप्रोत है। याज्ञवल्क्य ने उत्तर दिया वायु में जल ओतप्रोत है। अपने प्रश्न का समीचीन उत्तर प्राप्त करके भी गार्गी रुकी नहीं अपितु यही प्रश्न उसने वायु अन्तरिक्ष, गन्धर्वलोक, चन्द्रलोक, नक्षत्रलोक, देवलोक, इन्द्रलोक, प्रजापति लोक तथा ब्रह्मलोक के विषय में किया। गार्गी के द्वारा पूछे गए प्रश्नों की अविरतशृङ्खला से झुँझलाए हुए याज्ञवल्क्य ने कहा गार्गी मुझसे अधिक प्रश्न मत पूछो नहीं तो तेरा मस्तक गिर पड़ेगा। याज्ञवल्क्य के वचन सुनकर गार्गी रुक गई। उसके पश्चात् भी अनेक विद्वानों ने याज्ञवल्क्य के साथ शास्त्रार्थ किया एवं प्रश्नों का समाधान प्राप्त किया। पुन: ब्रह्मिष्ठों की सम्मति से गार्गी ने दो प्रश्न पूछे तथा दोनों का संतोषजनक उत्तर प्राप्त करके विद्वानों से बोली हे पूज्य ब्राह्मणों आपमें से कोई भी ब्रह्मवेत्ता इस ब्रह्मिष्ठ विद्वान् को नहीं जीत सकता है। गार्गी याज्ञवल्क्य के मध्य होने वाले शास्त्रार्थ में परम विदुषी गार्गी के वैदुष्य का चूडान्त निदर्शन प्राप्त होता है। विदुषी गार्गी के निर्णय के अनुसार शास्त्रार्थ में सभी ब्रह्मवेत्ताओं में याज्ञवल्क्य ही श्रेष्ठ थे। जनक ने शास्त्रार्थ में श्रेष्ठ सिद्ध होने वाले ब्राह्मण के लिए संकल्पित सोने से मढ़े हुए सींगो वाली एक हजार गाऐं प्रदान की। गार्गी यद्यपि अपने स्थूल शरीर से हमारे बीच नहीं है किन्तु अपनी कीर्त्तिकाया से आज भी वे नारियों के लिए प्रेरणा स्रोत है। राजस्थान सरकार ने राज्य में प्रतिभाशाली छात्राओं के लिए गार्गी पुरस्कार की योजना स्वीकार कर विदुषी गार्गी का एवं अपना गौरव बढाया है।

---

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम....................................पुत्र/पुत्री श्री............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस...........................**

**तहसील.................................जिला.........................राज्य...........................**

**देश....................पिन........................................दूरभाष.............................**

**मोबाईल नं.............................ईमेल...........................................................**

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**

ई–मेल – sanskritbharti09@gmail.com

आयुर्वेद-स्तम्भः

# वर्षास्वनिलरक्षणम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**ग्रीष्मे भास्करः स्वैर्मयूखैः जगतः स्नेहं पेपीयतेऽतस्तस्मिन् काले स्वादु शीतं द्रवं किञ्चित् स्निग्धमन्नपानं हितं भवति। ये हि ग्रीष्मे ग्रीष्मानुकूलमाहार-विहार-सेवनं न कुर्वन्ति तेषामग्निबलं क्षीणं भवति, धातुक्षयोऽपि जायते। कालस्वभावादुपर्युक्तैः कारणैश्च ग्रीष्मे वायुः सञ्चीयते। स हि सञ्चितो वायुः वर्षाकाले प्रकुप्यति। ग्रीष्माद् दुर्बले देहे पक्तापि दुर्बल एव भवति, स दुर्बलः पक्ता वर्षासु भूबाष्पान्मेघनिष्यन्दात् पाकादम्लाज्जलस्य चाधिकः क्षीणो भवति, तेन हि वातप्रधानस्य दोषत्रयस्य प्रकोपो भवति।**

ग्रीष्म में सूर्य अपनी किरणों से संसार के स्नेह को पीता है अतः उस समय मधुर, शीत, द्रव और किञ्चित् स्निग्ध अन्नपान हितकर होता है। जो ग्रीष्म में ग्रीष्म के अनुकूल आहार-विहार का सेवन नहीं करते हैं उनका अग्निबल क्षीण होता है, धातुक्षय भी हो जाता है। काल के स्वभाव से और उपर्युक्त कारणों से ग्रीष्म में वायु सञ्चित होता है। वह सञ्चित वायु वर्षाकाल में प्रकुपित होता है। ग्रीष्म के कारण दुर्बल देह में जाठराग्नि भी दुर्बल ही होती है। वह दुर्बल अग्नि वर्षा में भूवाष्प से, मेघों के चूने से (निष्यन्द से, नमी से) तथा जल का अम्लविपाक होने से (वह अग्नि) अधिक क्षीण हो जाती है। उस से वातप्रधान दोषत्रय का प्रकोप हो जाता है।

**अत एव वर्षासु त्रिदोषघ्नोऽग्निदीपनश्च विधिः कार्यः। व्यायाममातप-सेवनञ्च स्वल्पमात्रया बलं समीक्ष्य करणीयम्। पानभोजन-संस्कारे क्षौद्रप्रयोगः करणीयः। विशेषेण स्नानपानावगाहेषु स्वच्छस्य जलस्योपयोगो हितकारको भवति, पाने तु सर्वदाऽऽकाशीयजलस्याथवा तप्तशीतस्याधुनिकैः 'एक्वागार्ड-आर.ओ.' इत्यादिभिर्यन्त्रैः सुशुद्धस्यैव जलस्य वा प्रयोगः स्वास्थ्य-प्रदायको भवति। व्यञ्जनादीनां निर्माणे संस्कारे वा तैलस्यैव प्रयोगः सुखकारकोऽनिलापकृहश्च भवति। कालेऽस्मिन् वहतो जलस्य पाने प्रयोगो न करणीयः। उदमन्थं दिवास्वप्नमवश्यायमपि च त्यजेदेव। नलकूपजलस्य प्रयोगोऽप्यवधानतयैव करणीयः। स्वयं क्लिन्नो न भवेत्। क्लिन्नक्य स्थानस्य चापि सेवनं न करणीयम्। आत्महितं चिकीर्षता वर्षाजले स्नानमपि सावधानतया करणीयम्।**

इसलिए वर्षा में त्रिदोषघ्न और अग्निदीपनविधि करनी चाहिए। व्यायाम और धूपसेवन (धूप में काम करना) बल को देखकर अल्पमात्रा में करना चाहिए। पीने के द्रव्यों और भोजन का संस्कार करने में शहद का प्रयोग करना चाहिए। विशेष रूप से स्नान करने, पीने और अवगाहन में स्वच्छ जल का उपयोग हितकारक होता है। पीने में तो सर्वदा आकाशीय जल का अथवा गर्म करके ठण्डा हिए हुए जल का अथवा एक्वागार्ड या आर.ओ. इत्यादि आधुनिक यन्त्रों के द्वारा सुशुद्ध जल का ही प्रयोग स्वास्थ्यदायक होता है। व्यञ्जन इत्यादि के निर्माण में या उनके संस्कार में तैल का ही प्रयोग सुखकारक और वायु को दूर करने वाला होता है। इस समय में बहते हुए जल का प्रयोग पीने में नहीं करना चाहिए। अधिक जल मिला हुआ मन्थ (सत्तू का घोल, शर्बत आदि) तथा दिन में सोना और ओसका सेवन त्याग ही देना चाहिए। नलकूप के जल का प्रयोग भी सावधानी से करना चाहिए। गीला नहीं होना चाहिए और गीले स्थान का भी सेवन नहीं करना चाहिए। स्वयं का हित चाहने वाले व्यक्ति को वर्षाजल में स्नान भी सावधानी से करना चाहिए।

**वर्षाजलेन स्नानानन्तरं येन केनापि वा कारणेन क्लिन्नत्वावाप्त्यनन्तरमुष्णं पेयं पातव्यम्। विशेषेण तु पञ्चसंख्यात्मकानि मरिचानि संकुट्य विंशति-**

**संख्यात्मकैः तुलसीदलैः सह सम्मिश्र्य शतत्रय-मिलि-परिमिते जले समुत्क्वाथ्य सितोपलां यथारुचि दत्त्वा पेयमिदमुष्णमेव पिबेत्। वातवर्षाकुलेऽहनि तैसे तलितानां कटुकरसप्रधानानां किञ्चिल्लवणा-न्वितानां माषवटानां व्यक्ताम्लरागेण सह सेवनमनिल-शान्तये करणीयम्। ये हि वृद्धाः वातव्याधिभिः पीडिताः सन्ति, येषाञ्च सन्धिषु मांसपेशीषु वातनाडीषु च शूलं भवति तैर्विभिन्नानां वातनाशकानां योगराजगुग्गुलु कैशोर-गुग्गुलु-रास्नादिगुग्गुलु-पुनर्नवादिगुग्गुलु-त्रयोदशाङ्ग-गुग्गुलु-त्रिफलागुग्गुलु-सिंहनादेत्या-दिगुग्गुलुयोगानां प्रयोगः चिकित्सकस्य परामर्शेण करणीयः।**

वर्षाजल से स्नान के बाद अथवा जिस किसी भी कारण से गीला हो जाने के बाद उष्ण पेय पीना चाहिए। विशेष रूप से तो पाँच काली मरिच को कूट कर तुलसी के 20 पत्तों के साथ मिलाकर तीन सौ मि.लि. परिमाण के जल में क्वथित कर के रुचि के अनुसार मिश्री मिलाकर इस पेय को गर्म ही पीना चाहिए। वायु और वर्षा से व्याप्त दिन में तैल में तले हुए कटुरसप्रधान (चरपरे) तथा कुछ नमक से युक्त उडद के बड़ों का खट्टी चटनी के साथ सेवन वायु की शान्ति के लिए करना चाहिए। जो वृद्ध वातव्याधियों से पीडित हैं और जिनके सन्धियों में, मांसपेशियों में और वातनाडियों में शूल होता है उनके द्वारा विभिन्न वातनाशक योगराज गुग्गुलु, कैशोर गुग्गुलु, त्रिफलागुग्गुलु, और सिंहनाद इत्यादि गुग्गुलु के योगों का प्रयोग चिकित्सक के परामर्श से किया जाना चाहिए।

**अत्र केषाञ्चिद् वातव्याधिविनाशकानां योगा-नामुल्लेखः क्रियते, तेषु कस्यचिदेकस्य द्वयोर्वा योगयोः प्रयोगः वातव्याधिभिर्ग्रस्तैः वृद्धैः शूलादिभिः पीडितैर्युवादिभिर्वा निरापदरूपेण करणीयो वर्तते। यथा-**

**अजमोदादिचूर्णम्-**

**अजमोद-वचा-कुष्ठाम्लवेतस-सैन्धव-स्वर्जिकाक्षार-हरीतकी-शुण्ठी-मरिच-पिप्पली-ब्रह्मदण्डी-मुस्तक-सुवर्चला-सौवर्चल-शुण्ठ-धेतानि द्रव्याणि सममात्रायां गृहीत्वा चूर्णं करणीयम्। अत्र शुण्ठी वारद्वयं परिगणितात एव द्विगुण-मात्रायां गृहीतव्या शुण्ठी। अस्य चूर्णस्य ग्रामत्रयपरिमिता मात्रोष्णोदकेन सायं प्रातर्गहीतव्या। अस्य प्रयोगेण गृध्रसी-कटिशूल-सन्धिवात-उदरशूलेत्यादीनां विनाशं प्रशमो वा भवति। अस्य प्रयोगेण मांसपेशीशूल-नाडी-शूलयोरपि प्रशमनं भवति।**

यहाँ कुछ वातव्याधिनाशक योगों का उल्लेख किया जा रहा है, उनमें किसी एक का या दो योगों का प्रयोग वातव्याधि से ग्रस्त वृद्धों के द्वारा अथवा शूलादिं से पीडित युवा आदि के द्वारा निरापद रूप से करने योग्य होता है, यथा-

**अजमोदादिचूर्ण-**

अजमोद, वचा, कूठ, अम्लवेतस, सैन्धव नमक, सज्जी क्षार, हरड़, सोंठ, मरिच, पिप्पली, ब्रह्मदण्डी, नागरमोथा, हुलहुल, काला नमक तथा सोंठ इन द्रव्यों को समान मात्रा में लेकर चूर्ण करना चाहिए। यहाँ सोंठ को दो बार गिना गया है, इसलिए सोंठ को दोगुनी मात्रा में लेना चाहिए। इस चूर्ण की 3 ग्राम मात्रा गर्म पानी से सुबह-शाम लेनी चाहिए। इसके प्रयोग से गृध्रसी, कटिशूल, सन्धिवात, उदरशूल इत्यादि का विनाश या प्रशमन होता है। इसके प्रयोग से मांसपेशीशूल और नाडीशूल का भी प्रशमन होता है।

**अश्वगन्धादि-चूर्णम्-**

**अश्वगन्धां वृद्धदारकञ्च सममात्रायां गृहीत्वा चूर्णं विधेयम्। अस्य चूर्णस्य प्रयोग उष्णोदकेन ग्रामत्रयस्य मात्रायां प्रतिदिनं वारद्वयं करणीयः। अस्य प्रयोगेण वातवाहिनीनाडीनां शूलस्य मांसपेशीशूल-स्यामवातस्य च प्रशमनं भवति। शरीरं शक्तिसम्पन्नं परिपुष्टञ्च भवति।**

**चित्रकादिचूर्णम्-**

**चित्रक-पिप्पलीमूल-पिप्पली-गजपिप्पली-हिंगु-पुष्करमूल-दाडिमबीज-कृष्णजीरक-विडङ्ग-धान्यक-हपुषा-मिश्रेया-हिंगुपत्री-चव्य-अम्लवेतस-जीरक-यवानी-कर्चूर-वाचा-तुम्बुरु-अजमोद-सौवर्चलेत्येतानां द्रवाणां ग्रहणं सममात्रायां कृत्वा चूर्णं विधातव्यम्। चूर्णेनानेन समं शुण्ठीचूर्णं गृहीत्वा-बीजपूरकस्य रसस्य भावनां दत्वा सम्यक् मर्दनं करणीयम्। मर्दनं विनापि केवलं भावना-प्रदानेनापि चूर्णस्यास्य सुष्ठु निर्माणं कर्तुं शक्यते। चूर्णे रसं सम्पूणर्यातपे संशोषणं करणीयम्। बीजपूरकस्यालाभे सति सामान्यस्य निम्बुस्वरसस्य भावनां दत्त्वा संशोषणमातपे करणीयम्। परिशुष्कस्यास्य चूर्णस्य प्रयोगः ग्रामत्रयपरिमितायां मात्रायां प्रतिदिनं वारद्वयं भोजनादर्धहोराऽनन्तर-मुष्णोदकेन करणीयः। चूर्णस्यास्य सेवनेन सर्वाङ्ग शूलमुदरशूलं प्रवाहिका ग्रहणीदोषः गुल्मः प्लीहदोषश्च विनश्यन्ति। अग्निर्दीप्यते दोषस्य चाम-स्वरूपस्य पाचनं भवति। अरुचेर्नाश उदरस्थस्य चापानवायो-र्निरसनं समूलं भवति। अग्निवर्धकमिदं चूर्णं सर्वेषामग्निदोषाणां प्रशमने श्रेष्ठं वर्तते। आमवाते ऽप्युपयोग्येतच्चूर्ण-मुद्गारशुद्धिमपि करोति। अस्य प्रयोगः तक्रेणापि कर्तुं शक्यते।**

**उपर्युक्तानां सर्वेषां योगानां प्रयोगः वर्षासु समुचितो वर्तते। सामान्यतया त्वेतेष्वेकस्यैव योगस्य प्रयोगः वर्षाकाले करणीयः। अनेन वर्षाजनित रोगाणां प्रादुर्भूतिर्न भवति। अत एव स्वस्थोऽपि जनः कस्यचिदेकस्य योगस्य प्रयोगं वर्षासु यदि करोति तदा तस्य स्वास्थ्यस्य संरक्षणं भवति।**

**अश्वगन्धादिचूर्ण-**

अश्वगन्धा को और विधायरा को समान मात्रा में ले कर चूर्ण बनाना चाहिए। इस चूर्ण का प्रयोग गर्म जल से प्रतिदिन 3 ग्राम की मात्रा में प्रतिदिन 2 बार करना चाहिए। इसके प्रयोग से वातवाहिनी नाडियों के शूल का और मांसपेशियों के शूल का तथा आमवात का प्रशमन होता है। शरीर शक्तिसम्पन्न और पुष्ट होता है।

**चित्रकादि चूर्ण-**

चित्रक, पिप्पलीमूल, पिप्पली, गजपिप्पली, हींग, पुष्करमूल, अनारदाना, कालाजीरा, वायविडङ्ग, धनिया, हाऊबेर, सोया, हिंगुपत्री, चव्य, अम्लवेत, जीरा, अजवायन, कचूर, वचा, तुम्बुरु (नेपाली धनिया) अजमोद तथा काला नमक इस सब द्रव्यों को समान मात्रा में लेकर चूर्ण बनाना चाहिए। इस चूर्ण के बराबर सोंठ का चूर्ण लेकर बिजौरा निंबू के रस की भावना देकर अच्छी प्रकार से घोटना चाहिए। घोटे विना भी केवल भावना देने से इस चूर्ण का अच्छी प्रकार से निर्माण किया जा सकता है, (लेकिन घोटने से ज्यादा अच्छा बनता है)। चूर्ण में रस को भरकर धूप में सुखाना चाहिए। बिजौरा निंबू के नहीं मिलने पर सामान्य नींबू के रस की भावना देकर धूप में सुखाना चाहिए। सूखे हुए इस चूर्ण का प्रयोग तीन ग्राम की मात्रा में प्रतिदिन दो बार भोजन के आधा घण्टे के बाद गर्म जल से करना चाहिए। इस चूर्ण के सेवन से सम्पूर्ण शरीर में होने वाला शूल, उदरशूल, प्रवाहिका (पेचिश), ग्रहणीदोष, गुल्म और प्लीहदोष नष्ट होते हैं। अग्नि प्रदीप्त होती है, आमस्वरूपक दोष का पाचन होता है। अरुचि का नाश हो जाता है और उदरस्थ अपान वायु का समूल रूप से निकल जाना होता है। अग्निवर्धक यह चूर्ण सम्पूर्ण अग्निदोषों के प्रशमन में श्रेष्ठ है। आमवात (गठिया) में भी उपयोगी यह चूर्ण उद्गारशुद्धि भी करता है (डकार साफ आती है)। इस का प्रयोग तक्र से भी किया जा सकता है।

उपर्युक्त सभी योगों का प्रयोग वर्षा में उपयुक्त रहता है। सामान्य रूप से तो इनमें से किसी एक ही योग का प्रयोग वर्षाकाल में करना चाहिए। इससे वर्षाजनित रोगों की उत्पत्ति नहीं होती। इसलिए स्वस्थ मनुष्य भी किसी एक योग का प्रयोग यदि वर्षा में करता है तो उसके स्वास्थ्य का संरक्षण होता है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,